Burnell's Catalogue No. 10663 Page 171, Right column. Substance—Palm leaf. Size—18 × 1½ inches Leaves—57. Lines—7 to a Page. Script—Grantha. No. of Granthas—1800. Author—Murāri. Incomplete.

Beginning—Same as No. 4247.

End—The Ms. abruptly breaks off in the middle of the last act.

Colophon: Nil.

Subject—Same as No. 4247.

Remarks:—The Ms. is in good condition. The ends of certain leaves are injured.

॥ अनर्घराघवनाटकम् ॥

4257. ANARGHARĀGHAVANĀṬAKAM.

Burnell's Catalogue No. 5155. Page 171. Right column. Substance—Paper. Size—10½ × 5 inches. Sheets—88. Lines—8-9 to a Page. Script—Devanāgarī. No. of Granthas—1500. Author—Murāri. Incomplete.

Beginning—Same as No. 4247.

End—Breaks off abruptly in the middle of the sixth act (20th stanza.)

Remarks: —The Ms. is in good condition.

॥ अनर्घराघवनाटकम् ॥

4258. ANARGHARĀGHAVANĀṬAKAM.

J. L. Collection No. 606. Substance—Paper. Size—10 × 4⅝ inches. Sheets—13. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—250. Author—Murāri. Incomplete.

Beginning—The Ms. begins with the second act.

End—Breaks off in middle of the same act.

Colophon: Nil.

Remarks:—The Ms. is in a fairly good condition.

॥ अनर्घराघवनाटकव्याख्यानम् ॥

4259. ANARGHARĀGHAVANĀṬAKA-VYĀKHYĀNAM.

Burnell's Catalogue No. 5157. Page 171. Right column. Substance—Paper. Size—$11\frac{1}{10} \times 4\frac{1}{10}$ inches. Sheets—202. Lines—8 to 12 to a Page. Script—Devanāgarī. No. of Granthas—5018. Author—Rucipati. Complete.

Beginning:

श्रीगणेशाय नमः ॥

सुन्दरीशङ्कराभ्यां नमः ।

दोर्दण्डद्वितयेन खण्डपरशोः कोदण्डमारोपयन्
कुर्वाणः सहसा विदेहनृपतिं पूर्णप्रतिज्ञाभरम् ।
सानन्दं कुशिकात्मजेन सुदृशां वृन्देन कौतूहलात्
सव्रीडं प्रियया विलोकितमुखो रामोऽस्तु नः श्रेयसे ॥ १ ॥

अभूदभूतप्रतिपक्षभीतिः
सदा समासादितभूरिनीतिः ।
चिरं कृतार्थीकृतभूमिसूरि-
स्फुरत्प्रतापो नरसिंहदेवः ॥ २ ॥

सूनुस्तस्य वसुन्धरापरिवृढस्यानन्दकन्दक्षिते-
राधारो जगतामशेषविदुषां विश्रामकल्पद्रुमः ।
दाने कर्णकथावलेपनिपुणः संसाररत्नाङ्कुरो
भूमीपालशिरोमणिर्विजयते श्रीभैरवेन्द्रो नृपः ॥ ३ ॥

खौवालवंशजातः तस्यां देशान्महीशस्य ।
श्रीरुचिपतिरतिगूढं स्पष्टीकुरुते मुरारिवचः ॥ ४ ॥

इह खलु सकलपदार्थजातेषु स्वेष्टसाधनताज्ञानादेव प्रेक्षावत्प्रवृत्तिर्दृश्यते । तदुक्तं न्यायकुसुमाञ्जलावाचार्यपादैः । "तद्ज्ञानं विषयः तस्य विधिः" इति । तत्र च प्रयोजनाकांक्षायां "निर्दोषं गुणवत्काव्यमलङ्कारैरलङ्कृतम्" । विंदतीति सरस्वतीकण्ठाभरणे भोजराजेन "धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च । करोति प्रीतिं कीर्तिञ्च साधुकाव्यनिषेवणम्" इति ।

निःप्रत्यूहं इति ॥ भगवतो लोचने चक्षुषी उपास्महे आराधयाम इति संबन्धः । यत्तु लोचने इत्यस्य ते इत्यपेक्षितं यत्पदाकांक्षितत्वादिति तन्न । उत्तरत्र वाक्यार्थगतत्वेनोपात्तेन यच्छब्देन पूर्ववाक्यार्थगततच्छब्दानपेक्षणात् । ननु किमर्थमियमुपासना क्रियत इत्यत आह । निःप्रत्यूहमिति ॥

End:

दोषाकरं समवधीर्य गुणानशेषा-
नाशु प्रकाशयति सूर इवांशुराशीन् ।
यस्तं.... प्रणिहितोञ्जलिरेष नित्य-
मालोकनान्मम कृतेमुदमादधातु ॥

Colophon:

इति समस्तप्रक्रियाविराजमानहरिनामगणपदमलकः...श्रीमद्भैरवसिं-

हृदयनिवेशप्रोत्सादितवैजोळीग्रामवास्तव्य रुग्यौवालकुलो-
द्भवश्रीरुचिपतिमहोपाध्यायविरचितायां अनर्घराघवटीका-
यां सप्तमोङ्कः ।

शुभमस्तु । कल्याणमस्तु । श्रीकृष्णाय नमः ।

परब्रह्मगोविन्दजि उसहाइ ॥

Subject: Anargharāghavanāṭakavyākhyā. 1-7 Aṅkas. Complete.

Remarks:—The Ms. is in good condition.

The author of this commentary, Rucipati, belonged to Vaijoḷi Grāma and wrote this at the request of one Bhairavasimha, son of Narasimha. This commentary is available in print, in the Nirṇayasāgara Edition.

॥ अनर्घराघवनाटकव्याख्यानम् ॥

4260. ANARGHARĀGHAVANĀṬAKA-VYĀKHYĀNAM.

Burnell's Catalogue No. 5158. Page 171. Right column. Substance—Paper. Size—11½ × 5½ inches. Sheets—104. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—2700. Author—Rucipati. Incomplete.

Beginning:—Same as No. 4259.

End:

मुनिरपीति । एतां जगत्त्रयीं रघुपतिगुणक्रीताम् । रघुपतिः रामः, तस्य गुणेन क्रीतामवेहि जानीहि । "क्रीतात्करणपूर्वात्" इति ङीप् । कुतः मुनिरपि विश्वामित्रोऽपि दिव्यास्त्राणां गुरुः उपदेष्टा बभूव । दिवौकसां देवानां

अजगवधनुर्भङ्गे पिनाकनामकहरधनुर्भङ्गे तावानेव महो-
त्सवः धनुष्यमग्रे यादृश उत्सव............... ॥

Colophon: (Sheet No. 97)

इति वैजोलीमामवास्तव्यलोवालवंशप्रभवश्रीरुचिपतिमहोपाध्या-
यविरचितायामनर्घराघवटीकायां तृतीयोङ्कः ॥

Subject: Anargharāghavanāṭakavyākhyānam. 1-4 Aṅkas. Fourth incomplete.

Remarks:—The Ms. is in a good condition.

॥ अनर्घराघवनाटकव्याख्यानम् ॥

4261. ANARGHARĀGHAVANĀṬAKA-VYĀKHYĀNAM.

Burnell's Catalogue No. 5352. Page 56. Right column. Substance—Paper. Size—14×6 inches. Sheets—83. Lines—14 to a Page Script—Devanāgarī. No of Granthas—1600. Author—Rucipati. Incomplete.

Beginning—Same as No. 4259.

End:

पुण्यं च तत् अहश्चेति कर्मधारयः । पुण्याहं रक्षोमरण-
दीनं पुण्यसुदिनाख्यामहः क्लीबतेदा । तत्र मंगलं शुभ-
कर्म आदधातु न केवलं यां कामयितु(?) भूमिमात्रमपीत्यपे-
र्थः । यद्वा पुण्याहं जन्मदिनं सुखराशिभूत्सवदिनं तत्र
मङ्गलं यत्क्रियते तत्पुण्याहमङ्गलपदेनोच्यते । यस्य च
तत् क्रियते................................ ॥

Colophon: (Sheet No. 23)

इति श्रीरुचिपतिमहोपाध्यायविरचितायां अनर्घराघवटीकायां
प्रथमोऽङ्कः ॥

Subject: Anargharāghavanāṭakavyākhyānam 1-2 Aṅkas 2nd Incomplete.

Remarks:—The Ms. is in excellent condition. Dr. Burnell has mistaken this for a copy of the Pratāparudrīya and hence has put it under that heading on page 56.

॥ अनर्घराघवनाटकव्याख्या ॥

4262. ANARGHARĀGHAVANĀṬAKAVYĀKHYĀ.

J. L. Collection No. 607. Substance—Paper. Size—12×5 inches. Sheets—17. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—600. Author—Rucipati. Incomplete.

Beginning—Same as No. 4259.

End:

पुरा किल त्रिशङ्कुः क्षत्रियो राजा स्वदेहेन स्वर्गं गन्तुकाम इष्टिं कर्तुं वसिष्ठं प्र..... ....

Subject: Anargharāghavavyākhyā.

Remarks:—The Ms. is in a fairly good condition.

॥ अनर्घराघवनाटकव्याख्यानम् ॥

4263. ANARGHARĀGHAVANĀṬAKA-VYĀKHYĀNAM.

Burnell's Catalogue No. 10664. Page 171. Right column. Substance—Palm leaf. Size—16½×1 inches Leaves—183+3=186. Lines—6 to a Page. Script—Telugu. No. of Granthas—3400. Author—Harihara. Complete.

Beginning:

(अन्योन्यव्यस्तसामान्य स)मावेशनिदर्शनम् ।

अव्याजभक्तिसुलभमन्यादिभमुखं महः ॥ १ ॥

ऐश्वर्यैद्दावबैर्नित्यं नमो वाग्वोदमिः सुरैः ।
वन्दनीयां भजे वाणीं स्वाभीष्टफलसिद्धये ॥ २ ॥

बोम्मकन्दर्पयाचार्यं वन्दे यस्य कृपावशात् ।
अपि बालाः प्रगल्भन्ते वैदुष्योत्कर्षशालिनः ॥ ३ ॥

अस्ति शब्दे द्विर्मीमांस्यां प्रमाणे च कृतश्रमः ।
भारद्वाजो नृसिंहार्यसुनो हरिहरः सुधीः ॥ ४ ॥

व्युत्पन्नशब्दः प्रथितो यत्र व्युत्पन्नतामगात् ।
सोऽयं हरिहरः प्राह टीकामानर्घराघवीम् ॥ ५ ॥

इह खलु मुरारिरिति प्रसिद्धो महाकविर्नाटकरूपप्रबन्ध-निर्माणव्याजेन सकलपुरुषार्थसाधनं रामचन्द्रचिन्तनमभि-सन्धाय प्रारीप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्तिमभिलष-न् "आशीर्नमस्क्रियावस्तुनिर्देशो वापि तन्मुखम्" इत्या-लङ्कारिकीं मर्यादामनुसृत्य समुचितेष्टदेवतोपास्तिप्रति-पादनपरां नान्दीं प्रबध्नाति ॥ निष्प्रत्यूहमित्यादि ॥

End :

मधुस्यन्द इत्यनेन तस्य स्वहृदयानन्दजनकतया निर्दो-षत्वम् । शब्दार्थालङ्कारवत्ता च दर्शिता । तेन सगुणौ सालङ्कारौ निष्ठा च शब्दार्थदर्शितौ तयोरेव काव्यत्वात् । एतेन प्रकृतौ काव्यमित्युक्तं भवति तज्जागर्तु अविरामेण प्रकाशताम् ।

Colophon :

नायकानन्दो नाम सप्तमोऽङ्कः ।

बोम्मगण्डप्पयाचार्य शिष्यो (हरि)हराभिधः ।
अनर्घराघवस्येमां व्याख्यामरचयत्सुधीः ॥
ये शब्दशास्त्रे निष्णाताः ये शीलितनिघण्टवः ।
तेषामेवाधिकारोऽस्य ग्रन्थस्य परिशोधने ॥
बिन्दुदुर्लिपि + समीक्ष्य सज्जनाः ॥
मुरारिनाटकस्येमां टीकां हरिहरचिताम् ।
रामभट्टाभिधः क्षिप्रं लिलेख विरच्य फलम् ॥

Subject: Anargharāghavanāṭakavyākhyānam. 1-7 Aṅkas. Complete.

Remarks:—The Ms. is in a fairly good condition.

The author of this commentary is one Harihara, pupil of one Bomma Gaṇḍappācārya and son of Nṛsimhārya of Bharadvāja gotra. The present Ms. was copied by Rāmabhaṭṭa.

॥ अनर्घराघवनाटकव्याख्यानम् ॥

4264. ANARGHARĀGHAVANĀṬAKA-VYĀKHYĀNAM.

Burnell's Catalogue No. 10666 a. Page 171. Right column. Substance—Palm leaf. Size—17¾ × 1⅞ inches. Leaves—106 (1-106). Lines—8 to a Page. Script—Grantha. No. of Granthas—3100. Author—Harihara. Complete.

Beginning, end, colophon and subject—Same as No. 4263.

Remarks:—The Ms. is old and is in fairly good condition. This is the original of No. 4263.

The other works contained herein are:—

1. Anargharāghavavyākhyā.
2. Kāvyādarśa

॥ अनर्घराघवनाटकव्याख्या ॥

4265. ANARGHARĀGHAVANĀṬAKAVYĀKHYĀ.

J. L. Collection No. 608. Substance—Paper. Size—12×4¼ inches. Sheets—208 (1-77 & 1-131). Lines—8 to 9 to a Page. Script—Devanāgarī. No. of Granthas—3400. Author—Harihara. Complete.

Beginning, end, colophon and subject—Same as No. 4263.

Remarks:—The Ms. is in a fairly good condition.

॥ अनर्घराघवनाटकव्याख्या ॥

4266. ANARGHARĀGHAVANĀṬAKAVYĀKHYĀ.

S. S. Collection No. 195. Substance—Palm leaf. Size—16¾×1½ inches. Leaves—82. Lines—8-11 to a Page. Script—Grantha. No. of Granthas—3400. Author—Harihara. Complete.

Beginning, end, colophon and subject—Same as No. 4263.

Remarks:—The Ms. is in a decaying condition.

॥ अनर्घराघवनाटकव्याख्यानम् ॥

4267. ANARGHARĀGHAVANĀṬAKA-VYĀKHYĀNAM.

Burnell's Catalogue No. 5318. Page 171. Right column.

Substance—Paper. Size—18 × 6½ inches. Sheets—33. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—825. Author—Harihara. Incomplete.

Beginning—Same as No. 4263.

End:

इको गुणवृद्धिसूत्रे महाभाष्यकारैरन्यदेवेदं परिभाषान्तरमिति प्रयुक्तत्वादर्थान्यशब्दान्तरशब्दयोरन्यतरस्य वैयर्थ्यमिति कुचोद्यं निरस्तमिति वेदितव्यम् । केवलस्वभावस्यैव प्रयोजकत्वे दृष्टान्तमाह— कुमुदबन्धुरिति ॥ यदिति तृतीयार्थेऽव्ययम् । येन स्वभावमात्रेण...... ॥

Colophon: Nil.

Subject: Anargharāghavanāṭakavyākhyānam.

Remarks:—The Ms. is in excellent condition.

॥ अनर्घराघवनाटकव्याख्यानम् ॥

4268. ANARGHARĀGHAVANĀṬAKA-VYĀKHYĀNAM.

Burnell's Catalogue No. 10665 b. Page 171. Right column. Substance—Palm leaf. Size—18¼ × 1 inches. Leaves—52 (1-52). Lines—6 or 7 to a Page. Script—Grantha. No. of Granthas—1870. Author—Kṛṣṇa. Complete.

Beginning:

हरिः ॐ ॥

नमस्तस्मै भगवते लक्ष्मीनारायणात्मने ।
प्रपञ्चपरिणामस्य मूलभूताय हेतवे ॥ १ ॥

सन्तो न गणयन्त्येव सन्तो दोषान्स्वभावतः ।
असन्तस्त्वसतो दोषानध्यारोप्य वदन्ति च ॥ २ ॥

इत्थं मय्यसहायेऽत्र (ग्रन्थ?) दोषपरीक्षणे ।
त्वमेव वेत्ता नितरां सावधानः सदा भव ॥ ३ ॥

सूक्तिरत्नावळी यस्य गौडीसत्कर्णभूषणम् ।
वाल्मीकीयामाह्वयते वैदर्भी सूक्तिमौक्तिकीम् ॥ ४ ॥

अनर्घराघवे यस्य मुरारेर्नाटकोत्तमे ।
पदवाक्यार्थभावानां व्याक्रिया क्रियते मया ॥ ५ ॥

आरीप्सितस्य प्रबन्धस्य विघ्नशान्त्यर्थं पूर्वरङ्गे प्रधानभूतां नान्दीं शंसति ॥ निष्प्रत्यूहमिति ॥ अयमत्र "पूर्वरङ्गं विधायादौ सूत्रधारे विनिर्गते । प्रविश्य तद्वदपरः काव्यार्थं साधयेन्नटः ॥" इति हि नाटकारम्भः । पूर्वरङ्गो नाम कथासूचकः प्रथमप्रयोगः । तस्याङ्गानि प्रत्याहारावतरणोत्थापनपरिवर्तननान्दीप्रभृतीनि । तेषु नान्दीप्रधानभूतावश्यं कर्तव्या । तदुक्तम्— "यद्यप्यङ्गानि भूयांसि पूर्वरङ्गस्य नाटके । तथाप्यवश्यकर्तव्या नान्दी विघ्नप्रशान्तये ॥" इति ॥

* * *

सपत्नीकृतः सदृशीकृतः सदृशोऽस्यापत्न्यात् गुणवादः । एतदुक्तं भवति नाभीसरसिजस्य.. ... ...सूर्यचन्द्रात्मकतया यथास्थानं विकाससंकोचौ कुर्वती ,भगवतो

लोचने प्रत्यूहाभावाय तमुपास्महे इति कौमोदकीलक्ष्मेति भगवन्नामधेयोपादानमस्य नाटकस्य वीररसप्रायत्वं सूचयतीति केचिदुपदिशन्ति ॥ इष्टदेवतां नमस्करोति ॥ विरमतीति ॥

End:

मकरन्दशब्देन शृङ्गारादयो लक्ष्यन्ते । शब्दब्रह्माख्यं परि···मलमिति व्याकरतात्पर्येणोक्तम् । गङ्गेति एव.... स्रोतसो रूपाणि ब्रह्मणः कमण्डलुजलस्रोतांसि । मन्दाकिनी वियद्गङ्गा । भोगवती पाताळगंगा । एतदन्यानि एतत्स्वरूपाणि । त्रिलोकी लोकत्रयम् । श्रुतिशष्कुलीवलयितस्यामवगाही कर्णगोळकावच्छिन्नाकाशाश्रयः शब्दरूप इत्यर्थः । कवीनां वीरयशोरसायनमधुरस्यन्दः । कवीनां काव्यपित्यर्थः । जागर्तु प्रकाशताम् ॥

Colophon:

इति मुरारिव्याख्या परिसमाप्ता ॥

इति काश्यपगोत्रजस्य वरदराजसूरेः सूनुना कृष्णेन विरचिते मुरारिव्याकरणे प्रथमोऽङ्कः ॥

Subject: Anargharāghavanāṭakavyākhyānam 1-7 Acts. Complete.

Remarks:—The Ms. is in a fairly good condition.

For other works contained herein see No. 4264.

The author of this commentary, Kṛṣṇa was the son of one Varadarājasūri and belonged to the Kāśyapagotra.

॥ अनर्घराघवनाटकव्याख्या ॥

4269. ANARGHARĀGHAVANĀṬAKAVYĀKHYĀ.

J. L. Collection No 605. Substance—Paper Size—12 × 4¼ inches Sheets—257 (1-68, 2-46, 3-48, 1-60 & 1-35). *Lines—18 to a Page* *Script—Devanāgarī* *No of Granthas*—7700. Author—Rāmānandāśramin Incomplete.

Beginning

श्रीगणेशाय नमः ॥

ओङ्कारार्थाय विज्ञानदायिने लोकसाक्षिणे ।

करुणामयवीक्षाय दक्षिणामूर्तये नमः ॥

अस्त्यान्ध्रदेशे चरकूरिवंशः

कृष्णातटे काश्यपगोत्ररूढः ।

यो बह्वृचानां बहुमाननीयो

वंशे सदा कीर्तिसुवैजयन्तीम् ॥

तत्रोदभूत्सिम्मयसोमयाजी

बुधोऽष्टभाषाकविपद्मबन्धुः ।

नित्यान्नदाता निजभक्तिलभ्य-

श्रुतार्कपार्वीरमणप्रसादः ॥

तस्मादभूद्बह्वृचचक्रवर्ती

यज्ञेश्वरः पण्डितसार्वभौमः ।

सर्वाम्बिका सर्वगुणोपपन्ना

तस्य द्वितीया भवदम्बिकाम्बा ॥ ४ ॥

तास्यामुदभवन्पुत्राश्चत्वारः श्रीनिकेतनाः ।
त्रिविमन्त्रार्थनिपुणाश्चत्वारो निगमा इव ॥ ५ ॥

षड्दर्शनीतत्त्वविवेककर्ता
स्वशिष्यसम्पादितदिग्जयश्रीः ।
तेष्वादिमः पण्डितपट्टबन्धः
श्रीकोण्डभट्टो जयतीह लोके ॥ ६ ॥

लक्ष्मीधरस्तदनुजो दक्षिणामूर्तिकिङ्करः ।
सर्वविद्वत्कविमतः जयति क्ष्मातले सुधीः ॥ ७ ॥

स गार्हस्थ्ये चिरं स्थित्वा जित्वा सर्वदिशः सुधीः ।
संन्यस्याजनि योगीन्द्रो रामानन्दाश्रमाभिधः ॥ ८ ॥

जगत्प्राणास्वादी प्रतिदिनमधस्तात्सम्रुषितः
सदा रन्ध्रान्वेषी कुटिलतमवृत्तेन सहितः ।
द्विजिह्वानां वश्यः परुषविषसंस्पृष्टवचनः
कथं रामानन्दाश्रममुनितुलामेत्यहिपतिः ॥ ९ ॥

स करोति महायोगी मीमांसाद्वयपारगः ।
अनर्घराघवव्याख्यां प्रीतये विदुषां शुभाम् ॥ १० ॥

प्रमादादन्यथाबोधादज्ञानाद्वा विलिख्यते ।
यदत्र तन्मया सद्भिः क्षन्तव्यं कृपया मयि ॥ ११ ॥

अथ तत्र भवान्मुरारिर्नाम महाकविः प्रसिद्धकविसार्व-
भौमः सकलतन्त्रस्वतन्त्रः सङ्गीतसाहित्यसारस्य पारदृश्वा

नाटकनामधेयरूपकनिरूपणापदेशेन सकलपुरुषार्थसम्पादनसन्तानायमानमनन्तातनयानयनचकोरिकाचन्द्ररामचन्द्रचरितगुणवर्णनं मनसि निधाय चिकीर्षितस्य नाटकप्रबन्धस्याविघ्नपरिसमाप्तिप्रचयगमनमाशासानः * * नाटकादौ कर्तव्यां पूर्वरङ्गप्रसाधनाङ्गभूतां नान्दीमाचरति ॥ निष्प्रत्यूहमिति ॥

End:

॥ निष्क्रान्ताविति ॥ अङ्कत्वञ्चास्य प्रत्यक्षरामरूपनेतृचरितत्वाद्वालिवधार्थेनावान्तरार्थत्वेन व्यवहितस्य सीतानयनरूपप्रकृतार्थस्य सीतादेव्याः प्रवृत्तिमन्वेष्टुमित्यनेन बिन्दुना व्यक्तीभूतेन सहितत्वात् वालिवधनिमित्तकल्पनादिनानाविधसंविधानवीररौद्रकरुणशृङ्गाररूपनानारसाश्रयत्वाद्यावगन्तव्यम् । तदुक्तम् । "प्रत्यक्षनेतृचरितो बिन्दुव्यक्तिपुरःसरः । अङ्को नानाप्रकारार्थसंविधानरसाश्रयः" इति ॥ भद्रम् ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यकृष्णाश्रमपादशिष्यरामानन्दाश्रममुनिविरचितायामनर्घराघवव्याख्यायां इष्टार्थकल्पवल्लरीसमाख्यायां पञ्चमोऽङ्कः ॥ श्रीशिवार्पणमस्तु ॥ श्रीहालास्यपतये नमः । विकृतिसंवत्सरे माघमासे कृष्णपक्षे अमायामिष्टार्थकल्पवल्लरीसमाख्यानर्घराघवनाटकटीकायां पञ्चमोऽयमङ्कः पूर्णतामाप ॥

Subject Anargharāghavavyākhyā, otherwise known as Iṣṭārthakalpavallarī. 1-5 acts

Remarks:—The Ms. is in a fairly good condition.

The author was a Telugu Brahmin living on the banks of the Kṛṣṇā, in the district of Kṛṣṇa. He belonged to the Kāśyapagotra and the Ṛk, śākhā. The family name of this author was Carakūri. The following particulars could be gathered of his ancestry—In the Carakūri family there was one Timma Somayājin who was master of eight languages and had a title to that effect. He had a son by name Yajñeśvara. This Yagñeśvara married one Sarvāmbikā and they had four sons born to them. The eldest was Koṇḍubhaṭṭa, the author of a work called Ṣaḍdarśanītattvaviveka. The second was Lakṣmīdhara, who later on became a sanyāsin, under the name of Rāmānandāśrama and he is the author of the present commentary.

॥ अभिज्ञानशाकुन्तलम् ॥

4270. ABHIJÑĀNAŚĀKUNTALAM.

Burnell's Catalogue No. 5186. Page 173. Left column.
Substance—Paper. Size—$9\frac{1}{2} \times 4$ inches. Sheets—56.
Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—1189 Author—Kālidāsa. Complete.

Beginning:

श्रीगणाधिपतये नमः ।

या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम् ।
यामाहुस्सर्वभूतप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः ॥ १ ॥

नान्द्यन्ते

सूत्रधारः । नेपथ्याभिमुखमवलोक्य, आर्ये यदि नेपथ्यविधानमवसितं तर्हि इतस्तावदागम्यताम् ।

* * *

सूत्रधारः । आर्ये साधु गीतम् । अहो रागबद्धचित्तवृत्तिः आलिखित इव सर्वतो रङ्गः। तदिदानीं कतमत्प्रयोगमाश्रित्यैनामाराधयामः ।

नटी णं अज्जमिस्सेहिं पढम एव्व आणत्तं । अभि(हि)ण्णाणसाउंदलं णाम अउव्वं णाडअं पओए अहीकरीअदुत्ति ॥

End

तर्हीदमस्तु भरतवाक्यम्—

प्रवर्ततां प्रकृतिहिताय पार्थिवः
सरस्वती श्रुतमहिता महीयसाम् ।
ममापि च क्षपयतु नीललोहितः
पुनर्भवं परिगतशक्तिरात्मभूः ॥ ३५ ॥

इति निष्क्रान्ताः सर्वे ॥

Colophon

सप्तमोङ्कः । विश्वावसुनामके सवति कोलग्रामे श्रीपतिना लिखितेयं शकुन्तला ॥

Subject Śākuntalanāṭaka 1-7 Aṅkas

Remarks:—The Ms is in a fairly good condition

No remarks are necessary regarding Kālidāsa For the latest information regarding his birth and nativity, please refer

to the "Birthplace of Kālidāsa" by Mr. Lachmi Dhar, published by the Delhi University and the article on the date of Kālidāsa in the "Allahabad University Studies" Vol. V by Kṣetreśandra Cattopādhyāya of the Allahabad University. Referance may also be made to Dr. Keith's "Sanskrit Drama". Several editions of the Śākuntala are available. The Śrī Vāṇī Vilās Press edition is the best one.

There are several copies of the Śākuntala in this library and they are tabulated in the following pages.

Descriptive No.	Collection No.	Substance	Size inches	No. of Sheets or leaves.
4271	B. L. 5137	Paper.	$9\frac{3}{10} \times 4\frac{4}{5}$	81
4272	„ 5138	do.	$11\frac{1}{3} \times 4^{4}$	88
4273	„ 5139	do.	$10\frac{3}{8} \times 4\frac{1}{3}$	76
4274	„ 5140	do.	$11\frac{1}{4} \times 4\frac{1}{8}$	59
4275	„ 5141	do.	$9\frac{3}{4} \times 4\frac{9}{10}$	69
4276	„ 5143 and Ms. 14667	do.	$10\frac{1}{8} \times 6$	50
4277	„ 5810	do.	$13\frac{4}{5} \times 5\frac{3}{5}$	60
4278	„ 10563	Palm leaf.	$17 \times 1\frac{1}{8}$	70
4279	„ 10564	do.	$13\frac{1}{4} \times 1\frac{1}{4}$	62
4280	„ 10565	do.	$15\frac{1}{4} \times 1\frac{1}{8}$	45
4281	„ 10566	bo	$16 \times 1\frac{1}{2}$	46
4282	„ 10567	do.	$17\frac{4}{5} \times 1\frac{9}{10}$	52
4283	„ 10568	do.	$16\frac{1}{4} \times 1\frac{1}{8}$	52
4284	„ 10569	do.	$8\frac{1}{2} \times 1\frac{1}{2}$	65
4285	„ 10572	do.	$14\frac{1}{2} \times 1\frac{1}{4}$	46
4286	J. L. 610	Paper.	$9\frac{1}{2} \times 4$	71
4287	T. S. 718	do.	$9\frac{1}{2} \times 4\frac{1}{4}$	80
4288	„ 719	do.	$8\frac{1}{2} \times 4$	52
4289	S. S. 193	Palm leaf	$9\frac{1}{2} \times 1\frac{1}{4}$	54
4290	M. S. 14668 & 5146	Paper	$9\frac{1}{2} \times 4$	42
4291	„ 5144	do.	$7\frac{9}{10} \times 4\frac{3}{5}$	46
4292	T. S. 720	do.	$11 \times 4\frac{1}{2}$	41
4293	B. L. 5142	do.	$10\frac{1}{4} \times 8$ [illegible]	54

No. of Lines per Page or Sheet.	Script	Complete or otherwise.
9-11	Devanāgarī	Complete.
11	do.	„
9	do.	„
8	do.	„
10	do	„
12	do.	„
10	do.	„
5	Grantha.	„
8	do.	„
8	do.	„
9	do.	„
7	do.	„
5-7	do.	„
9 or 10	do.	„
8-9	do.	„
10	Devanāgarī.	„
9 or 10	do.	„
8-10	do.	„
9	Malayālam.	„
8	Devanāgarī.	Incomplete. (1-6 Acts wants end)
12	do.	„ (1-7 Acts wants two sheets in the middle.)
11	do.	„ (1-7 Acts same sheets are missing in the 1st Act.)
6	do.	„(1-4 Acts wants end)

Descriptive No.	Collection No.	Substance	Size inches	No. of sheets or leaves
4294	B. L. 5148	Paper.	8×5	36
4295	J. L. 611	do.	10×5	22
4296	B. L. 10570	Palm leaf.	$7\frac{3}{8}\times1\frac{1}{2}$	35
4297	S. K. 214	Paper.	$11\frac{1}{4}\times4\frac{1}{2}$	17
4298	B. L. 5147	do.	$10\frac{1}{4}\times4$	18
4299	,, 10571	Palm leaf.	$17\frac{1}{8}\times1\frac{1}{2}$	7
4300	,, 5145	Paper.	$10\times4\frac{8}{10}$	6
4301	J. L. 612	do.	$10\times4\frac{1}{2}$	27
4302	T. S. 737 c	do.	$7\times4\frac{1}{4}$	7

No. of Lines per Page or Sheet.	Script	Complete or otherwise.
11	Devanāgarī.	„ (1-4 Acts)
18	do.	„ (1-4 Acts wants end)
9	Telugu.	„ „
9-11	Devanāgarī.	„ (1-3 Acts wants end)
7	do.	„ (1st Act wants end)
8-10	Grantha.	„ (1-2 Acts wants end)
11	Devanāgarī.	„ (1st Act wants end)
12	do.	„ (3-6 Acts wants beginning)
13	do.	„ (3rd Act wants beginning)

॥ अभिज्ञानशाकुन्तलव्याख्यानम् ॥

4303. ABHIJÑĀNAŚĀKUNTALAVYĀKHYĀNAM.

Burnell's Catalogue No. 10578. Page 178. Right column. Substance—Palm leaf. Size—17⅜×1 inches. Leaves—68 (4-66). Lines—7 to a Page. Script—Grantha. No. of Granthas—1800. Author—Kāṭayavemabhūpaḥ. Complete. (wants beginning).

Beginning:

(आर्यमिश्रैः प्रथममेवाज्ञप्तम्—) अभिज्ञानशाकुन्तलं नामापूर्वं नाटकं प्रयोगेणालङ्क्रियतामिति। प्रयोगेण (अभिनयेन अलङ्क्रियतां भूष्यतां प्रकटीक्रियतां इति) शाकुन्तलं शकुन्तलामधिकृत्य कृतम्। "अधिकृते ग्रन्थे" इत्यण्प्रत्ययः। अभिज्ञानप्रधानं शाकुन्तलं अभिज्ञानशाकुन्तलम्, शाकपार्थिवादित्वात्समासः॥

End:

प्रवर्ततामित्यादि॥ पार्थिवः राजा। जातावेकवचनम्। प्रकृतिहिताय प्रकृतीनां प्रजानां हिताय इष्टाचरणाय प्रवर्ततां प्रयततां * * आत्मभूः स्वयंभूः परमेश्वर इत्यर्थः। ममापि पुनर्भवं पुनर्जन्म क्षपयतु अपाकरोतु। अत्र भरतः नाट्यार्थस्य परिसमाप्तत्वादनु....त्वमुत्सृज्याशिषं प्रत्युक्तवानित्यनुसन्धेयम्। अत्र शुभशंसनात्प्रशस्तिर्नाम सन्ध्यङ्गमुक्तं भवति। यथो-

क्रम्— "प्रशस्तिश्शुभशंसनम्" इति ।

इति निष्क्रान्ताः सर्वे ॥

Colophon:

इति श्रीकाटयवेमभूपविरचिते कुमारगिरिराजीये शाकुन्तल-
व्याख्याने सप्तमोऽङ्कः । शाकुन्तलटीका समाप्ता ॥

Subject: Abhijñānaśākuntalanāṭakavyākhyāna. 1-7 Acts. Wants beginning only.

Remarks:—The Ms. is in a fairly good condition

॥ अभिज्ञानशाकुन्तलनाटकव्याख्यानम् ॥

4304. ABHIJÑĀNAŚĀKUNTALANĀṬAKA-VYĀKHYĀNAM.

Burnell's Catalogue No 10574. Page 173 Right column. Substance—Palm leaf. Size —16½ × 1½ inches. Leaves—65 (4–68). Lines—7 to a Page Script – Grantha. No. of Granthas—1800. Author—Kāṭayavemabhūpa. Complete. (wants beginning)

Beginning, end, colophon and subject—Same as No. 4303.

Remarks: —The Ms. is in a fairly good condition. Last three leaves are eaten away at the right end.

॥ अभिज्ञानशाकुन्तलनाटकव्याख्यानम् ॥

4305. ABHIJÑĀNAŚĀKUNTALANĀṬAKA-VYĀKHYĀNAM.

Burnell's Catalogue No. 10575. Page 173. Right column.

Substance—Palm Leaf. Size—14×1⅞ inches. Leaves—77. Lines—7 to a Page. Script—Grantha No of Granthas—1600. Author—Kāṭavavemabhūpa. Incomplete. 1-6 Acts.

Beginning:

वेदानीनां विशुद्धानां विधानां जन्महेतवे ।

पार्वतीपरतन्त्राय परस्मै वस्तुने नमः ॥

Same as No 4306.

End:

अस्मात्परमित्यादि ॥ धौताश्रुशेषं धौतं अश्रु येन तत्तथोक्तम् । तस्मादुदकाच्छेषं अवशिष्टम् । अस्सदु भट्टा । आश्वसतु भर्ता ॥ २ ॥ विज्ञन्तंपि दीवे ववआणदोसेण एसो अन्धआरं अणुहोदि । विद्यमानोऽपि दीपे व्यवधानदोषेण एषोन्धकारमनुभवति । अहं दाणिं एव्व णं णिव्वुदं करिस्सं । अहव(1) सुदं मए ॥

Colophon: (Leaf No. 188).

इति श्रीकाटयवेमभूपालविरचिते कुमारगिरिराजीये शाकुन्तलव्याख्याने पञ्चमोङ्कः ॥

Subject: Abhijñānaśākuntalanāṭakavyākhyāna 1-6 Acts. 6th Incomplete.

Remarks:—The Ms is in a fairly good condition.

॥ अभिज्ञानशाकुन्तलनाटकव्याख्यानम् ॥

4306. ABHIJÑĀNAŚĀKUNTALANĀṬAKA-VYĀKHYĀNAM.

Burnell's Catalogue No 5149. Page 178. Right column

Substance—Paper. Size—$10\frac{2}{10} \times 5\frac{2}{10}$ inches. Sheets—82. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—1000. Author—Kāṭayavema. Incomplete.

Beginning:

श्रीगणेशायनमः ॥

वागर्थाविव + पार्वतीपरमेश्वरौ ॥ १ ॥

चतुर्दशविधानां च विद्यानां जन्महेतवे ।
पार्वतीपरतन्त्राय परस्मै वस्तुने नमः ॥ २ ॥

कीर्तिप्रतापसौभाग्यत्यागभोगविभूषितः ।
एक एव बहुश्लाघ्यः कुमारगिरिजो नृपः ॥ ३ ॥

मुनिनां भरतादीनां भोजादीनां च भूभुजाम् ।
शास्त्राणि सम्यगालोच्य नाट्यवेदार्थवेदिनाम् ॥ ४ ॥

प्रोक्तं वसन्तराजेन कुमारगिरिभूभुजा ।
नाम्ना वसन्तराजीयं नाट्यशास्त्रमनुत्तमम् ॥ ५ ॥

तत्रोक्तेनैव मार्गेण दर्शितं नाट्यलक्षणम् ।
कवीनामाश्रयो मन्त्री काटभूपतनूद्भवः ॥ ६ ॥

सोऽयं वेमविभुः कुमारगिरिणा राज्ञा नियुक्तः कृती
नाट्यानां त्रितयं कृतं कृतिविधौ श्रीकाळिदासेन यत् ।
तस्योद्रिक्तमनोज्ञवस्य रसिकः शाकुन्तलादेः स्वयं
व्याख्यानं कुरुते कुमारगिरिराजीयाख्यमस्मै शुभम् ॥ ७ ॥

अत्र कालिदासकविः प्रारीप्सितस्य ग्रन्थस्याविघ्नेन
परिसमाप्त्यर्थं इष्टदेवतानमस्कारपूर्वकमाशिषं प्रयुङ्क्ते ॥

या सृष्टिरित्यादि ॥ ईशः अवत्विति संबन्धः । कीदृशः शिवः ? प्रत्यक्षाभिरिन्द्रियग्राह्याभिरष्टमूर्तिमद्भिः प्रपन्नः उपेतः । कीदृश्यस्तनवः ? या स्रष्टुर्ब्रह्मणः आद्या प्रथाना सृष्टिः अनेन जलमयी तनुरुक्ता । "अप एव ससर्जादौ" इति विधिस्मरणात् । या विधिहुतं विध्युक्तप्रकारेण दत्तं हविः हव्यं वहति दधाति देवतार्थमिति शेषः । "देवेभ्यो हव्यं वहति" इति श्रुतेः । अनेन अग्निमयी तनुरुक्ता ॥

End

महाभाग इत्यादि ॥ महाभागो महाभाग्यः । अभिन्नस्थितिः अविहितमर्यादः । "मर्यादा धारणा स्थितिः" इत्यमरः । वर्णानां ब्राह्मणादीनां मध्ये अपकृष्टोऽपि अकिञ्चनोऽपि अपथमार्गं न भजते । सर्वोऽपि संसर्गयोग्ययोवे(?) त्यभिप्रायः । तथाप्येवमपि परितः विविक्तेन परिचरिमासे(?) वितमविविक्तं विजनं येन । यथोक्तं येन मनसा उपलक्षितः । जनाकीर्णं प्रजासंकुल इदं गृहं हुतवहपरीतमिव अनलाक्रान्तमिव मन्ये मन्येऽहं दुस्सहमित्यर्थः ॥ अभ्यक्तमिवेत्यादि ॥ स्पष्टोऽर्थः । अमो किपियामेदरेणे अणिवि अरेदि अहो अ... . . ॥

Colophon (Sheet No 66)

इति को(का)टयेमभूपालविरचिते कुमारगिरिराजीये शाकुन्तलव्याख्याने तृतीयोऽङ्कः ॥

Subject Abhijñānaśākuntala(vy)ākhyāna 1 5 Acts, 5th

Incomplete.

Remarks :— The Ms. is old and is in a fairly good condition.

॥ अभिज्ञानशाकुन्तलनाटकव्याख्यानम् ॥

4307. ABHIJÑĀNAŚĀKUNTALANĀṬAKA-VYĀKHYĀNAM.

Burnell's Catalogue No. 10576. Page 178. Right column. Substance—Palm leaf. Size—15×1 inches. Leaves—48. Lines—6 or 7 to a Page. Script—Telugu. No. of Granthas—1300. Author—Kāṭayavemabhūpāla. Incomplete.

Beginning—Same as No. 4306.

End:

याहमस्य प्रत्ययेन मुखमधो हृदयविषस्य हस्ताभ्यास-
मुपगता । रोदिति रोदनं करोति । .... ॥

Colophon : Nil.

Subject : Abhijñānaśākuntalanāṭakavyākhyāna. 1-5 Acts 5th Incomplete.

Remarks :—The Ms. is in a decaying condition.

॥ अभिज्ञानशाकुन्तलनाटकव्याख्यानम् ॥

4308. ABHIJÑĀNAŚĀKUNTALANĀṬAKA-VYĀKHYĀNAM.

Burnell's Catalogue No. 5150. Page 178. Right column. Substance—Paper. Size—9⅘×5⅛ inches. Sheets—65. Lines—18 to a Page. Script—Devanāgarī. No. of Gran-

thas—1886. Author—Rāghavaḥ. Incomplete. (1-4 Acts 4th only begins).

Beginning:

श्रीगणेशायनमः ॥

यत्रेधाजनि दशधा द्विधागतं य-

द्यज्जातं दशविधमेति षोडशत्वम् ।

यद्गीतं समम्हदादिकस्य चाद्यं

तेजस्तज्जयति हिमोष्णरूपमभ्यम् ॥ १ ॥

* * *

वाचिकाद्यभिनयोपमनाट्या-

चार्यमत्र भरतं मुनिमीडे ।

लास्यताण्डवनियोजनलीला-

कौशलेन परितोषितभर्गम् ॥ ५ ॥

अथ नाटकादौ पूर्वरङ्गाङ्गभूतामाशीरूपां चतुरस्रता-लानुसारिणीमष्टपदां सूत्रधारो नान्दीं पठति— या स्रष्टिरिति । या तनुः स्रष्टुर्ब्रह्मण आद्या सृष्टिः, जल-मित्यर्थः । "अप एव ससर्जादौ तासु वीर्यमपासृजत्" इति स्मरणात् ।

End:

पुष्पोच्चयं रूपयति । पूर्ववत् सखि प्रकृतिवक्रः सः क-स्मानुनयं प्रतिगृह्णाति । किंचित्पुनः सानुक्रोशः सकृपः कृतः । "कृपा दयानुकम्पा स्यादनुक्रोशोऽप्यथो हसः"

इत्यमरः । तस्मि... तदपि कथय यदा निर्वर्तितुं नेच्छ-

ति तदा विज्ञापितो मया । प्रथम इति प्रेक्ष्य विचार्य अत्र

कोपः कर्तुं न.. .... ॥

Colophon: (Sheet No. 64)

इत्यर्थद्योतनिकायां शाकुन्तलटीकायां तृतीयोङ्कः समाप्तिमगमत् ॥

Subject: Abhijñānaśākuntalanāṭakavyākhyāna, called Arthadyotanikā 1-4 Acts; 4th only begins.

Remarks:—The Ms. is in good condition.

॥ अभिज्ञानशाकुन्तलव्याख्या ॥

4309. ABHIJÑĀNAŚĀKUNTALA-VYĀKHYĀ.

J. L. Collection No 618. Substance—Paper. Size—9¼×4 inches. Sheets—73. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—1800. Author—Ghanaśyāma Complete.

Beginning:

श्रीगणेशायनमः ॥ श्रीसरस्वत्यैनमः ॥

नत्वा नागमुखं मुदं कृतिमयीं कुर्मः परस्मै मुदां

कीर्तिं कुर्मह आत्मनो मनसि नः का मुक्तिमुक्तयोः कथा ।

निर्वाणाय नटीमवज्ञातिकृतामस्माकमास्ते शिवो

नारीभूपमयं निलिम्परतये नारायणो वा प्रभुः ॥ १ ॥

* * * *

आत्मा यः शिवयोश्चिदम्बरमहायोगीन्द्रशाकम्भरी
भ्राता श्रीद्वयसुन्दरीकमलजः काशीमहादेवजः ।
मन्त्री चोलमहीभुजोऽतिगरिमा तुक्कोजिराजस्य यो
नम्रः सप्तदिवावदीति स घनश्यामः कवीनां कविः ॥ ६ ॥

* * * *

लक्ष्मीशो न विकल्पते तदितरः सर्वोत्तमत्वे हरे
गौरीशोऽपि न कल्पते तदितरः सर्वोत्तमत्वे हरौ ।
यैरेषां पदरेणवः शिरसि नः सन्त्वत्र यौद्धान्तकृ-
द्गीताभाष्यसहस्रनामविवृती एते प्रमाणं सताम् ॥ ८ ॥

अथैतन्नाटकस्थायिसविधानावबोधने ।
संक्षेपणेन वस्त्वादिनिर्देशः क्रियतेऽधुना ॥ १ ॥

अष्टमूर्त्यङ्कितो नान्दीश्लोकः सूत्रधरो नटी ।
प्रस्तावनायां तदनुसूतो दुष्यन्तभूपतिः ॥ २ ॥

* * *

सप्तमाङ्के फलं ग्रन्थे दौष्यन्तेश्चक्रवर्तिता ।
पुनरुक्तिं विनासार कथितो वस्तुसङ्ग्रहः ॥ १९ ॥

व्युत्पत्त्यैव तदिदं संविधानं पुनः पुनः ।
विभाव्य प्रथमं पश्चान्नाटकं परिशील्यताम् ॥ १० ॥

अथ सायणमाधवादिपुरातनकविसमानकालिको
भाग्यनिमित्तवशात्कामुकराजन्योपदेशेन श्यामलादेवी-
लिखितबीजाक्षरसङ्गः कालिदासकविर्यशसे व्युत्पत्तिकन-

कनिकषोपलप्रायं नाटकं शाकुन्तलं नाम चिकीर्षुरविघ्नपरिपूरणाय सम्प्रदायानुभवसिद्धं चतुर्दशभुवनात्मकश्रीमदीशानसम्प्रार्थनारूपमङ्गलमाचरति ॥ येति ॥ आद्या सुष्टिरापः "अप एव ससर्जादौ" इति स्मरणात् । या अभिरूपातनुरिति शेषः ॥

End:

तया च एकः परमेश्वर एव चतुर्दशभुवननिर्माणशासनधौरन्धरीचतुरचतुराननदण्डधरखण्डकतया जन्मलययोर्लयप्रदस्तद्व्यतिरिक्तेषु त्रयस्त्रिंशत्सङ्ख्याकेष्वतिथिनन्दनेषु कश्चिदयोध्याद्वारवत्यादिषु स्थलजलेषु प्रतियुगं जन्मलययोरधीनीभवतीति कवेर्भाव इति दिक् ॥

Colophon:

इति महाराजपद + शाकुन्तलसञ्जीवनाख्यटिप्पणे सप्तमोऽङ्कः ॥

बहुधान्यनामसंवत्सरे उत्तरायणे माघमासे शुक्लपक्षे तृतीयायां तिथौ

शुक्रवासरे इदं पुस्तकं नारायणद्रविडेन लिखितम् ।

यादृशं पुस्तकं + मम दोषो न विद्यते ।

Subject: Śākuntalavyākhyā otherwise known as Sañjīvanī.

Remarks:—The Ms. is in a fairly good condition.

A paper transcript of this Ms. is found in this library. See T. V. No. 478.

This commentary is not available in print.

॥ अभिज्ञानशाकुन्तलव्याख्या ॥

4310. ABHIJÑĀNAŚĀKUNTALAVYĀKHYĀ.

J. L Collection No 614 Substance—Paper Size—$7\frac{1}{2}\times5$ inches Sheets—75. Lines—12 to 18 to a Page. Script—Devanāgarī. No. of Granthas—1850 Author—Ghanaśyāma Complete

Beginning, end and subject—Same as No 4309

Colophon:

इति महाराजपद० शाकुन्तलसञ्जीवनाख्यटिप्पणे सप्तमोऽङ्क. ॥

सम्पूर्णमिदं घनश्यामपण्डितीयं शाकुन्तलाव्याख्यानम् ॥

Remarks —The Ms is in good condition

॥ अभिज्ञानशाकुन्तलव्याख्यानम् ॥

4311. ABHIJÑĀNAŚĀKUNTALAVYĀKHYĀNAM.

J. L Collection No 615 Substance—Paper Size—$7\frac{1}{2}\times5$ inches Sheets—87 (25-32 & 59-87) Lines—13 to a Page Script—Devanāgarī No of Granthas—600 Author—Ghanaśyāma Incomplete (Wants beginning).

Beginning

बलवदवस्था । "अवस्थात्वाविदर्शयोः" इत्यनेकार्थ-

ध्वनिमञ्जरी । निर्वापणाय परिहरणाय ॥

End and colophon—Same as No 4309

Subject Śākuntalavyākhyā—otherwise known as Sañjīvanī

Remarks —The Ms is in a fairly good condition

॥ अभिज्ञानशाकुन्तलप्राकृतविवृतिः ॥

4312. ABHIJÑĀNAŚĀKUNTALAPRĀKṚTA-VIVṚTIḤ.

Burnell's Catalogue No. 5151. Page 173. Right column. Substance—Paper. Size—9⅜ × 3⅜ inches Sheets—20. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—450. Author—Nārāyaṇa Bhaṭṭa. Complete.

Beginning:

श्रीगणेशाय नमः । श्रीरेणुकायै नमः ।

नटी— आर्यपुत्रेयमस्मि । आज्ञापयत्वार्यः । को नियो-गोऽनुष्ठीयतामिति ।

नटी— सुविहितप्रयोगतया आर्यस्य न किमपि परि-हास्यते ।

नटी— एवमेव । अनन्तरं करणीयन्तावदार्य आज्ञा-पयतु ॥

End:

अनसूया —भगवन् अनया दुहितृमनोरथसम्पत्त्या क-ण्वोऽपि तावत् श्रुतविस्तरः क्रियताम् । दुहितृवत्सला मे-नका इहैवोपचरन्ती तिष्ठति । मनोरथः खलु मे भगव-त्या............ ।

Colophon:

इति श्रीमद्रामेश्वरभट्टसुतनारायणभट्टविरचितायां शाकुन्तल-प्राकृतविवृतौ सप्तमोऽङ्कः ॥ ७ ॥

॥ अभिज्ञानशाकुन्तलव्याख्या ॥

4310. ABHIJÑĀNAŚĀKUNTALAVYĀKHYĀ.

J L Collection No 614 Substance—Paper Size—7½ × 5 inches Sheets—75. Lines—12 to 13 to a Page. Script—Devanāgarī No of Granthas—1850 Author—Ghanaśyāma Complete

Beginning, end and subject—Same as No 4309

Colophon

इति महाराजपद० शाकुन्तलसञ्जीवनाख्यटिप्पणे सप्तमोऽङ्कः ।

सम्पूर्णमिदं घनश्यामपण्डितीयं शाकुन्तलव्याख्यानम् ॥

Remarks —The Ms is in good condition

॥ अभिज्ञानशाकुन्तलव्याख्यानम् ॥

4311. ABHIJÑĀNAŚĀKUNTALAVYĀKHYĀNAM.

J. L Collection No 615 Substance—Paper Size—7½ × 5 inches Sheets—37 (25-32 & 59-87) Lines—13 to a Page Script—Devanāgarī No of Granthas—600 Author—Ghanaśyāma Incomplete (Wants beginning)

Beginning

बलवदवस्था । "अवस्थात्वार्तिदर्शयोः" इत्यनेकार्थध्वनिमञ्जरी । निर्वापणाय परिहरणाय ॥

End and colophon—Same as No 4309

Subject Śākuntalavyākhyā—otherwise known as Sañjīvanī

Remarks —The Ms is in a fairly good condition

यावत्तोत्सवसिसेविषासमवेतैरधिगताखिलकलाकलापैर्‌ :
शेषाभिमवक्रमतिनिटिलकुट्टनकुट्टाकंपदैपै(?) तंत्रमेवाद्भि-
रखिलैरमीभिः सङ्कल्प्यावद्भिः * * *

सू ॥ आमेत्यर्थोक्ते(स्मृतिमभिनीय सहर्षम्) । आ
ज्ञातम् ॥

अस्ति श्रीरङ्गभर्तुः कनकमयमहापद्ममूत्रावतार-
श्रीरङ्गाचार्यवर्यस्वजनिकृतपरिष्कारवाधूलवंशः ।
बन्धान्मुक्तः करीन्द्रः कृतजनमथनो दूरधूताङ्कुशोद्रा-
क्सेविरवा यस्य पादौ सविनयकुतुकं स्वीयमालानमाप ॥

तस्मादभूदखिलभूपतिचक्रवाल-
कोटीररत्नरुचिरंजितपादपद्मः ।
औदार्यनिर्जितसुरद्रुमकामधेनु-
श्चिन्तामणिर्वरदर्देशिकसार्वभौमः ॥

भोगे भूपति रूपे स्मरति शुचित्वे धनञ्जयति ।
वात्सल्येऽपि.........लवरदगुरुवर्यः ॥

* * *

तत्पादाम्बुज(युग्म)भक्तितटिनीकल्लोलिनीवल्ल...
वात्स्यश्रीमदहोबलार्यजनुषः श्रीकोलसूरेः सुतः ।
विख्यातो भुवि वीरराघवकविः विद्वन्मुदे नाटकं
चक्रे तादृशसंविधानमधुरं हस्ते तदास्ते मम ॥

तत्प्रयुञ्जानः समामिमां समाजयामि ॥

रसवच्चेतो येषां केषामपि जायते सुधियाम् ।
संरंसास्ते एव येषां सौरभमिक्षोरिवान्यस्मै ॥

Subject : Śākuntalavyākhyā.

Remarks.—The Ms. is in good condition.

The author, Nārāyaṇabhaṭṭa calls himself the son of Rāmeśvara Bhaṭṭa. Perhaps this Rāmeśvarbhaṭṭa is the same as the famous ancestor of Kamalākarabhaṭṭa, in which case the work may be placed in the early half of the 16th century.

॥ इन्दिरापरिणयम् ॥

4313. INDIRĀPARIṆAYAṀ.

J. L Collection No 610 Substance—Paper. Size—12×5 inches. Sheets—40 Lines—13 to a Page Script—Devanāgarī No of Granthas—900 Author—Vīrarāghavācārya. Incomplete

Beginning

भद्रं वो विदधातु वारिधिसुतावक्षोजकुम्भोज्ज्वलैः
काश्मीरैरतिवित्पिहताः सुरवपुर्ष्याकीर्णरक्तैरिव ।
रागं वक्षसि विभ्रदम्बुजभवाद्युत्संसितान्निस्तुमैः
रक्तौघैरिव वारिधिर्गुणगणैर्युक्तो वृषाद्रीश्वरः ॥

* * *

नान्द्यन्ते सूत्रधारः ॥

* * *

सूत्र ॥ आर्ये समादिष्टोऽस्मि ॥ * श्रीरङ्गराजस्य चैत्र-

निर्वर्तित एव विवहनविधिः यदमूरान्ध्रमहासुरगुरन्ध्रयः शोभनाभिगाथाभिः वधूवरयोराराविकं मंगलमाचरन्ति । तत्त्वरितमुपसर्पामि (इति तथा करोति) । (सर्वे सदस्याः ससम्भ्रममुत्थाय तेन सह यथोचितमुपविशन्ति ।)

रत्नाकरः ॥ (आत्म) दे...... ।

Colophon: (Sheet No. 15.)

चतुर्थोऽङ्कः ।

Subject: Indirāpariṇaya 1-5 acts.

Remarks:—The Ms. is in a decaying condition. Only a few lines are wanting towards the end of the 5th act.

Vīrarāghavakavi, the author of this drama, Indirāpariṇaya, gives his genealogy as follows:—

Ahobalārya (of Vatsa gotra)
|
Śrīśailasūri
|
Vīrarāghava.

The Ahobalārya was the pupil of one Varadadeśikārya, son of Śrī Raṅgācārya of Vādhūlagotra.

Once God Śrī Raṅganātha, the presiding deity of Śrīraṅgam appeared in a dream before the author of the work—Vīrarāghavakavi and ordered him to compose a drama treating of the marriage of Mahāviṣṇu with Lakṣmī. The present work was composed at the order of the God. The drama itself was acted before the audience who were present at the Caitrotsava at Śrīraṅgam. The work has not yet been printed.

नटी ॥ किं णामअं तं णाडअम् (छाया । आर्य किं-
नामकं तन्नाटकम् ॥

सू ॥ कविनैवोक्तं तन्नाम ॥

का सुधाम्भोधितनया कल्ता धचे भुजान्तरे ।
इद प्रश्नोत्तरद्वन्द्वनामक किल नाटकम् ॥ इति ॥

सू ॥ आर्ये महत्तम इति वक्तव्यम् ॥ यदस्य कवेः ॥ स्वप्ने
देवः कमलया साकं समेत्य सादरमिदमादिदेश ॥

वीरराघवार्य चारु नाटकं त्वमावयो-
र्नामत' किलेन्दिराविवाहमुल्लसद्रसम् ।
वीतदोषमद्भुतं कुरुष्व मत्प्रसादतः
फुल्लपुष्करस्फुरन्मरन्दमञ्जुसूक्तिभिः ॥

* * *

आर्ये किमन्यत् ॥
सद्गुणावतां सभादेशं समर्पयितुमुत्सहे ।
सरोजसम्भवस्याज्ञां सोऽय सुरमुनिर्यथा ॥

End

(ततः प्रविशति रत्नाकरः ॥)

रत्नाकरः ॥ अहो मे जन्मन साफल्यम् । यदिदानीं
वत्साय वृषाचलपतेश्च विवाहमहोत्सवे नयनानन्दम-
नुभवामि ॥ (परिक्रामितकेन विभाव्य) ; कथं

निर्वर्तित एव विवहनविधिः यद्मूरान्ध्रमहीसुरपुर-
न्ध्रयः शोभनाभिगाथाभिः वधूवरयोरारात्रिकं मंगल-
माचरन्ति । तत्त्वरितमुपसर्पामि (इति तथा करोति) ।
(सर्वे सदस्याः ससम्भ्रममुत्थाय तेन सह
यथोचितमुपविशन्ति ।)

रत्नाकरः ॥ (आत्म) दे...... ।

Colophon: (Sheet No. 15.)

चतुर्थोऽङ्कः ।

Subject: Indirāpariṇaya 1-5 acts.

Remarks:—The Ms. is in a decaying condition. Only a few lines are wanting towards the end of the 5th act.

Vīrarāghavakavi, the author of this drama, Indirāpariṇaya, gives his genealagy as follows:—

Ahobalārya (of Vatsa gotra)
|
Śrīśailasūri
|
Vīrarāghava.

The Ahobalārya was the pupil of one Varadadeśikārya, son of Śrī Raṅgācārya of Vādhūlagotra.

Once God Śrī Raṅganātha, the presiding deity of Śrīraṅgam appeared in a dream before the author of the work—Vīrarāghavakavi and ordered him to compose a drama treating of the marriage of Mahāviṣṇu with Lakṣmī. The present work was composed at the order of the God. The drama itself was acted before the audience who were present at the Caitrotsava at Śrīraṅgam. The work has not yet been printed.

उत्तररामचरितम् ॥

4314. UTTARARĀMACARITAM.

Burnell's Catalogue No 5197. Page 167. Left column.
Substance—Paper. Size—$10\frac{1}{4}\times2\frac{1}{2}$ inches. Sheets—47.
Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—1150. Author—Bhavabhūti. Complete.

Beginning:

श्रीगणेशाय नमः ॥

इदं कविभ्यः पूर्वेभ्यो नमोवाकं प्रशास्महे ।
वन्देमहि च तां वाणीममृतामात्मनः कलाम् ॥ १ ॥

End:

इदमस्तु भारतवाक्यम् ॥
पापेभ्यश्च पुनाति वर्धयति च श्रेयांसि सेयं कथा
माङ्गल्या च मनोहरा च जगतो मातेव गङ्गेव च ।
तामेतां परिभावयन्त्वभिनयैर्विन्यस्तरूपां बुधाः
शब्दब्रह्मविदः कवेः परिणतां प्राज्ञस्य वाणीमिमाम् ॥

Colophon: Nil.

Subject: Uttararāmacaritam 1-7 acts.

Remarks:—The Ms. is in good condition.

Bhavabhūti, it is well known, was the court poet of Yaśovarman and Lalitāpīḍa and he was flourishing in the last quarter of the 8th century. Bhavabhūti was otherwise known as Umbveka and he was a pupil of Kumārila Bhaṭṭa.

There are several editions of this work, the most noteworthy among them being the edition in the Harward Oriental Series by Dr. Belvalker. Consequently the several Mss. of this work have been arranged in a tabular form below.

Descriptive No.	Collection No.	Substance	Size inches	No. of Sheets or leaves
4315	B. L. 5198	Paper.	9¼×4	79
4316	„ 5199	do.	10¼×4	78
4317	„ 5200	do.	9⅞×4½	47
4318	„ 5320	do.	14×5¾	44
4319	„ 10597	Palm leaf.	15¾×1½	61
4320	„ 10598	do.	18½×1½	33
4321	„ 10599	do.	14½×1⅛	45
4322	„ 10600	do.	8¾×1½	41
4323	„ 10601	do.	18½×1½	35
4324	J. L. 617	Paper.	8×4	61
4325	B. L 10602	Palm leaf.	16½×1½	46
4326	„ 10603	do	15½×1½	32
4327	J. L. 618	Paper.	10×4	41
4328	B. L. 10604	Palm leaf.	17×1½	32
4329	„ 5201	Paper.	9¼×4⅛	27
4330	„ 10605	Palm leaf.	11⅜×1½	9
4331	J. L. 619	Paper.	10×4	17
4332	„ 620	do.	„	14

No. of Lines per Page or Sheet.	Script	Complete or otherwise.
8 or 9	Devanāgarī.	Complete.
8	do.	"
10 or 11	do.	"
10	do.	"
6	Grantha	"
9	do.	"
7	do.	"
10-12	do.	"
8	do.	"
10	Devanāgarī.	"
7	Grantha.	Incomplete. (1-7 Acts, wants end)
8	do.	" "
10	Devanāgarī.	" (1-7 Acts, wants some sheets in the middle.)
8	Grantha.	" (1-6 Acts, wants end.)
8	Devanāgarī.	" (4-7 Acts)
8	Grantha.	" (1st Act wants end)
8	Devanāgarī.	" (5-6 Acts wants beginning and end.)
7	do.	" (1st Act wants beginning and end.)

॥ उत्तररामचरितव्याख्या ॥

4333. UTTARARĀMACARITAVYĀKHYĀ.

J. L. Collection No. 621. Substance—Paper. Size—7½ × 5 inches Sheets—36. Lines—20 to a Page. Script—Devanāgarī. No. of Granthas—900. Author—Ghanaśyāma. Complete.

Beginning:

श्रीगणपतये नमः ॥

चतुर्दशजगद्व्योऽस्य नतिमाचक्ष्महे वयम् ।
वञ्चितामेदजैर्मोहैरेतावन्तमनेहसम् ॥ १ ॥

यद्व्याख्याता विद्धसालभञ्जिका छिद्रितार्थके ।
विद्धे स्तम्भे सालभञ्जिकायिता यत्र नायिका ॥

तनुरुचि यो न श्यामः कविः कवीनां स यदि घनश्यामः ।
कवते कमनश्यामः किमसूयाभिर्मुधैव न श्यामः ॥ ३ ॥

* * *

अथैतन्नाटकस्थायिसंविधानावबोधने ।
वस्तुपात्रादिनिर्देशः संग्रहात्क्रियते मया ॥

इदं कविभ्य इत्यादिमनूपद्ये प्रामाणिकैरितः ।
वन्द्यो गणेशः पूर्वार्धे उत्तरार्धे सरस्वती ।
श्रीमान्कालप्रियानाथो देवः सूत्रधरो नटः ॥

* * *

भ्रमं विनावधातव्यं मन्त्रज्ञैः सूक्ष्मदृष्टिभिः ।
शिष्योक्तेन पथानेन नाटकं परिशील्यताम् ॥

अथ कालिदासादिसमानकालिको भोजराजाश्रयः श्रीकण्ठनामा "साम्बा पुनातु भवभूतिपवित्रमूर्तिः" इति श्लोकनिर्माणवेलागुणवशादानन्दभरितेन राज्ञैव भवभूतिरिति ख्यापितः कविः ।

End:

कवेर्भवभूतिनाम्नः मम वाणीं नाटकमयीं वाचं अविनयैर्लेखनपठनपाठनप्रचारणाभिनन्दनादिभिः "प्रचारणादौ भावाङ्गदर्शनेऽभिनये मतः" इत्यगस्त्यः ॥ परि परितः। परि....रिति केदारः। भावयन्तु लालयन्तु॥ "आदरे लालने चस्या भावनोक्तिजये" इत्यलमतिविस्तरेण ॥

Colophon:

इति महाराजपद+उत्तररामचरितसञ्जीवनाख्यटिप्पणे सप्तमोऽङ्कः। सम्पूर्णमिदमुत्तररामचरितव्याख्यानम् घनश्यामयिम्॥ साम्बाय नमः॥

Subject: Uttararāmacaritavyākhyā, otherwise known as Sañjīvani 1-7 acts.

Remarks:—The Ms. is in a fairly good condition.

Ghanaśyāma has been referred to already as a profuse writer. For detailed remarks on him see No. 3869 of Vol. VII. The present work is a commentary on the Uttararāmacarita by him. *The work has been published recently by Mr.* Kane, Bombay.

॥ उत्तररामचरितव्याख्या ॥

4334. UTTARARĀMACARITAVYĀKHYĀ.

J. L. Collection No 633. Substance—Paper. Size—7¼×6

inches. Sheets—40. Lines—16 to a Page. Script—Devanāgarī. No. of Granthas—1280. Author—Ghanaśyāma. Complete. (wants end)

Beginning, end, colophon and subject—Same as No. 4333.

Remarks:—The Ms. is in a fairly good condition.

The introductory portion is missing in this manuscript.

॥ ऐन्दवानन्दनाटकम् ॥

4335. AINDAVĀNANDANĀṬAKAM.

Burnell's Catalogue No 5250. Page 167. Right column. Substance—Paper. Size—9¾ × 8½ inches. Sheets—70 (3-74 13th missing). Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—1180. Author—Rāmacandra. Incomplete. (wants beginning)

Beginning:

……………केरलीकुन्तलश्री-

विविधसुरभिगन्धिःखेचरप्राणपेयः ।

उदचरत चिराय यामिहानेतुमिच्छ-

न्निव सुरनिकुरुम्बं यद्गृहे यज्ञधूमः ॥

यः खलु कविभिरुपश्लोक्यते ॥

तन्मग्नं भुवनं मनागपि यशःपीयूषसिन्धोः कचि-

त्काले चेदभविष्यदम्बरगलद्गङ्गातरङ्गत्विषः ।

मध्ये मेदिनि च प्रतापदहनो नाभास्यदर्चिद्वयं

गाढाध्मातसुमेरुशङ्करगिरिः किं हेमरूप्यद्रवैः ॥ १ ॥

अपि च ।

मामैषीः कमले भृशं विकिरति श्रीरामचन्द्रप्रभु-
स्त्वामित्यम्ब तवास्ति पूरणकरः सर्वो नृपाणां गणः ।
भ्राता ते विधुरम्बुधिः किल पितापीतः परे पूर्यते
मायावी न स कृष्ण एष हृदये यस्त्वां चिरं धास्यति ॥ १ ॥

तस्य चक्रवर्तिनः सम्यगानन्दाय भगवद्व्यासपाद-प्रणीत ययातिचरितमाश्रित्य गुहवंशनभस्तलैकहंस गौडेन्द्रमहामात्यकविपण्डितप्राप्तविश्वासस्थानपदवी-कश्रीहर्षपदाभिधेयानामात्मजस्य रामचन्द्रकवेर्विरचना नवीनमैन्दवानन्दनामनाटकमेतदाराधनार्थं मह्यमभि-रोचते । तत्र परामृश्यतु भवान् ।

सूत्रधारः । प्रिये, किं यस्य प्रार्थयितव्यञ्चैतत् ।

कृताञ्जलिर्वः प्रणिपत्य याचे
महानुभावाः परिहासतोऽपि ।
श्लाघाञ्च निन्दाञ्च परीक्षकत्वा-
दयुज्यमानामिह नावहध्वम् ॥

नटी । अह इम् ।

* * *

अवि अ ।

उत्फुल्ला चूअलआ कुसुमहसिअ सोहणी अवासन्ती ।
एक्को भमरजुआणो किं कुणउदुवे पलोअचो ॥

(नेपथ्ये) सखे सत्वरमेहि अनेन विपिनवर्त्मना महाराजो ययातिर्यास्यतीति जनश्रुतिः । तदेहि पश्चात्तावदपूर्वपरिच्छदं भूमिपम् ।

सूत्र । (आकर्ण्य) । प्रिये नृपदर्शनाय मुनिकुमाराविव एवाभिवर्तेते । तद्भाविसंमर्दां भूमिं त्यजाव इति निष्क्रान्तौ ॥

॥ प्रस्तावना ॥

End :

राजा । भगवति । किमन्यदप्युपकर्तव्यमस्ति ॥

परिवर्तितचेतसी इमे निबिडप्रेमतया मिथः कृते ।
अनयोरपि पुत्रकाः पुनः कृपया ते परिवर्तिता मम ॥

तथापीदमस्तु ।

आस्तां दुःखवतां कपर्दिनिमतिः मन्दारदामोज्ज्वला
प्रीयन्तां गृहमेधिषु ... .. त्याहताः शेरताम् ।
कुर्वन्तु प्रमदासु भूरिषु रतिं तुल्यां युवानः श्रिये
प्रस्निग्धाश्च परस्परं नृपतयो....रं बिभ्रतु ॥

अपि च ।

ग्रन्थग्रन्थिलबुद्धयो मधुरसप्रस्यन्दिवाचश्चिरं
मोदन्तां कवयः कठोरतरुणी(वक्षो)जतुङ्गाशयाः ।
वैदग्ध्यं परिवर्धयन्तु चतुरै(?)रुद्दामधर्मश्रियो
राजानः करवालकालहृदयक्रूरैः खलैरुज्झिताः ॥

इति निष्क्रान्ताः सर्वे ॥

Colophon:

पूर्णकामोनामाष्टमोऽङ्कः ।

श्रीरामचन्द्रकवेः कृतिरैन्दवानन्दं नाम नाटकं सम्पूर्णम् ॥

॥ शुभमस्तु ॥ श्रीरामकृष्णाय नमः ॥

Subject: Aindavānandanāṭakam 1-8 acts.

Remarks:—The Ms. is in a decaying condition.

One Rāmacandra Kavi is the author of this work. He seems to have been a native of Bengal and he was the son of one Śrī Harṣa.

The work itself deals with the story of Yayāti of purāṇic fame. This drama is not available in print.

॥ कमलाकण्ठीरवम् ॥

4336. KAMALĀKAṆṬHĪRAVAM.

Burnell's Catalogue No. 10683. Page 167. Right column. Substance—Palm leaf. Size—$15\frac{1}{2}\times1\frac{1}{2}$ inches. Leaves —54. Lines—6 to a Page. Script—Grantha. No. of Granthas—1200. Author—Nārāyaṇa. Incomplete.

Beginning:

श्रीगणाधिपतये नमः ॥

मायद्गण्डस्थलान्तः प्रभवमदझरीमज्जदुन्मज्जदुच्चै-

र्गायत्स्फायत्प्रमोदभ्रमरवरवधूल्लासमुत्पादयन्तः ।

केऽप्येते स्पर्शमात्राद्विदलितदुरिताः कर्णतालीपवाता

विघ्नाधीशस्य मन्तु प्रहृतपरिमला भूयसे श्रेयसे वः ॥

अपि च ।

संजज्ञे यस्य चन्द्रे मनस (?) दितर्वाश्चक्षुषो विश्वचक्षु-
र्यस्य प्राणप्रभेदात्समजनि च जगत्प्राण एवं प्रमाणः ।
यद्वक्त्राम्भोजगर्भाज्जननमगमतां जन्मभिद्वीतिहोत्रौ
सोऽयं पायादपायात्पुरुष उपगतोऽशुपेषः सदा नः ॥

*   *   *

सू ॥ आर्ये अपि सुनिर्वर्तितो रङ्गसमुदाचारः । अथ समु-
दिताः खलु भाग्यवशाद्भगवतः काञ्चीवल्लभस्य श्री-
मदेकाम्रनाथस्य यात्राप्रसङ्गेन नानाविधाङ्गवङ्गकलिङ्गम-
गधमालवगौलचोलपाण्ड्यप्रमुखा नानादिग्देशवासिनः
सकलकलाधुरीणाः संश्रितजीवलोकवाञ्छापरिपूरणप-
ठिष्ठपुष्पदेवमहीरुहा सुरवारविलासिनीप्रार्थितयौवन-
श्रिय सकलेबरकलियुगकामदेवा भूमिदेवाः । तत्कुत
उदासते भरताः

*   *   *

(प्रविश्य) नटी ॥ अय्य कोणु तारिसो पबंधो ।
(आर्य को नु तादृशः प्रबन्धः)

सूत्र ॥ (स्मरणमभिनीय ।) अस्ति खलु काञ्चीमण्ड-
ले प्रपञ्चितपञ्चमहायज्ञैरसकृदावर्तितसप्ततन्तुभिरन्वह-
मञ्चितार्थिजनसार्थैर्दुरवगाहपद्दर्शनीसरोवराहा(व)

यमानः * परमपावनाक्षीणक्षीरतरङ्गिणीताण्डवि-
ततरङ्गरङ्गस्थलायितपलपपरिसरो ब्रह्मदेशो नाम
महानग्रहारः। तत्रास्ति कश्चिद्विपश्चिच्छिखामणिः
षड्दर्शनीसार्वभौमभट्टाचार्यो गौतमान्ववायदुग्धा-
र्णवाभ्युदयपूर्णचन्द्रमाः सरस्वतीभण्डारप्राकारः श्री-
मल्लक्ष्मीधराध्वरिसार्वभौमो नाम पवित्रकीर्तिः।

तथा हि।

मिश्रो लज्जाविमिश्रः स्खलति खलमतिः लुप्तधैर्यस्तथार्यः
सन्दिग्धाध्वा च मध्वागमगुरुरधिकक्षामरामानुजोक्तिः।
निर्वेदी भेदवादी भवति च बहुधा तस्करो भास्करोऽपि
श्रीमल्लक्ष्मीधराध्वर्यतुलबुधवरे वादकेलीं प्रविष्टे॥

अपिच।

वाहायुक्तिप्रवाहा प्रबलकरिघटा भाट्टवाणीघटास्ता
योधाः सत्तर्कबोधाः शुकगुरुवचसामर्थटीकापताकाः।
भूषा शेषस्य भाषा गुरुमतिविततं शास्त्रमच्छातपत्रं
श्रीमल्लक्ष्मीधराध्वर्यतुलबुधवरे वादधाटीं दधाने॥

किञ्च।

पौष्पान्रसान्परिहसन्ति सुधां वमन्ति
द्राक्षां क्षिपन्ति किल माक्षिकमाक्षिपन्ति।
संफुल्लवारिरुहगन्धसगन्धभूता
लक्ष्मीधराध्वरिविभोर्वचसां विलासाः॥

तस्य चात्मसम्भवः सकलसद्गुणसुधासुधाकरः कविता
वल्लभः कवितार्किकचूडामणिः नारायणो नाम सूरि
सिंहः ॥ स किल नैसर्गिकसुहृद्भावेन भरतेषु वर्तमानः
स्वयं कमलाकण्ठीरवं नाम नाटकरत्नं निर्माय्यास्मास्व-
र्पितवान् । तत्किमिति कण्ठकलितचामीकरमापण इव
मृग्यते ।

सूत्रधारः ॥ आर्ये साधु गीत कर्णामृतम् ।
मनोहारि तथा स्फीत गीतं ते सचमत्क्रियम् ।
कण्ठीरवस्य चरितमिद कर्णामृतं यथा ॥
इति निष्क्रान्तौ ॥
॥ प्रस्तावना ॥

End

चाम्पेयिका ॥ (विदूषकस्योपरि नीलोत्पलं पात
यति)
विदूषकः ॥ (सहसा प्रबुध्य) अविह अविह कु०
अभअं अभअ ॥ भो भो मण्डूओ मे उवरि पडिदो (भो
भो मण्डूको मे उपरि पतितः) मण्डूकदर्शनं नाटयति)
राजा ॥ (सहसोपसृत्य) । सखे किमत्याहितम् ॥
(कमलाप्यनुसृत्य) ॥ विहारवापीविलोकनविनि
र्मितलतावलयवातायनविनिवेशितमुग्ध . .. ।

Colophon (Leaf No 43)

चतुर्थोऽङ्कः ॥

Subject Kamalakanthirava 1-4 acts

Remarks:—The Ms. is in good condition. This Ms. abruptly ends towards the close of the fifth act.

Nārāyaṇa, the author of this drama was the son of Lakṣmīdharādhvarin who was a master of all the Śāstras. They resided in the village of Brahmadeśa on the banks of the Pālār, near Kāñcīpura in the Chingleput District.

The work deals with the story of the marriage of King Kaṇṭhīrava with Kamalā.

The work has not been printed so far.

॥ कलानन्दकम् ॥

4337. KALĀNANDAKAM.

Burnell's Catalogue No. 5247. Page 168. Left column. Substance—Paper. Size—10⅝ × 5½ inches Sheets—74. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—1600. Author—Rāmacandraśekhara. Complete.

Beginning:

कल्याणं कलयन्तु साधु जगतां देवाश्च देवीरपि
त्यक्त्वान्योन्यसमागतैकमनसोः संयापितानेहसोः ।
तत्रादृङ्निजयोगवैभवकलासंसिद्धिसंयोगयो-
र्गाढाश्लिष्टवपुष्मतोश्च शिवयोरन्वर्बुदः सन्ततम् ॥

नान्द्यन्ते सूत्रधारः ॥ (नेपथ्याभिमुखमवलोक्य)
आर्ये इतस्तावत् ॥

(प्रविश्य) नटी ॥ अंअइअंहि । दाणिं किणुखु
कादव्वं । आणवेदु अय्यउत्तो ।

सूत्रधारः ॥ अथ खलु श्रीमत्प्रतापरामचन्द्रसुन्दरतरच-
रणारविन्दद्वन्द्वनिस्यन्दमानमकरन्दबिन्दुसन्दोहसमा-
स्वादनामन्दानन्दतुन्दिलमनोमिलिन्दराजस्य प्रताप-
सिंहमहाराजस्य संपूर्णतपोविशेषैः परमेश्वरस्य
कृपार इव कृपारस्तूर्णमवतीर्णः तुलजमहाराजः राम-
चन्द्रशेखरपौण्डरीकयाजिनं समाहूय स्वविलासेन पर-
माद्भुतवस्तुनन्दकचरितं परिकल्प्य नाटकीकर्तव्यमिति
समादीदिशत् ।

ततस्स कविकुञ्जरः श्रवणरञ्जनं धीमतां
सुधाप्रपनयाधुरीमरधुरीणमुग्धगुणम् ।
नवीनमतनीच्छुभं मधुरकल्पनाकल्पकं
चतुर्मुखवधूपरिष्करणहाटकं नाटकम् ॥
तेन नवेन नाटकेन सामाजिकानुपतिष्ठे ।

नटी ॥ अय्य एआरिससविहाणणेवुण्णं कुदो से संपण्णम् ।

सूत्रधारः ॥ शृणु तावदतिरहस्यम् ॥ तथाहि ।

कालीवक्त्रसरोजसम्पुटनटद्वीटीरसज्ञःकविः
पञ्चव्याकरणज्ञतां परिहरन्पूर्णां स्वविद्यास्विव ।
सर्वव्याकरणार्थबोधनकलां पुष्णन् स निष्णातधी-
रिन्थे भोसलसन्तत्तौ तुलजभूपालापदेशात्खलु ॥
निस्सीमा तस्य महिमा ॥

श्रीमान्नेपालपाण्ड्यद्रमिलकुरुमहाराष्ट्रसौराष्ट्रभोज-
  स्फूर्जत्कर्णाटलाटक्षितिपतिमकुटोत्तंसिताज्ञामनोज्ञः ।
विद्यापद्यानवद्यादरकलिततया चण्डवेतण्डगण्ड-
  भ्राम्यद्भृङ्गाङ्गनालीमुखरमिह गृहं सत्कवीनां विधत्ते ॥

तं किल ।

जनता वदतीह वाहिनीशं
  भुवनाधारतया च सत्त्ववत्त्वात् ।
शिवमाश्रितसर्वमङ्गलत्वा-
  द्विलसत्सत्त्वतया परं पुमांसम् ॥

किञ्च ।

दोर्दण्डाग्रशिखाण्डितुण्डदलितद्विण्मण्डलीकुण्डली
  विद्युत्पाण्डरपुण्डरीकपटलीचण्डांशुरेष प्रभुः ।
येनाकारि रणे कृपाणलतिका पाणौ स्फुरन्ती ध्रुवं
  मुक्ताकङ्कणकान्तिभिः कुसुमिता वीरश्रियो वेणिका ॥

यस्य किल समज्यायाम् ।

यशःकलशसिन्धुराद्कुमुदबान्धवा बान्धवाः
  प्रबन्धकविसिन्धुरप्रणयदायका गायकाः ।
चतुर्दशकलारसोल्लसनभासुरा भूसुरा
  भवन्त्यमृतमाधुरीभरितभाषिता योषितः ॥

* *

सूत्रधारः ॥

  प्रतनादपि नूतनं मनोज्ञं
    प्रचुरीभूतमलङ्क्रियागुणैश्चेत् ।

तरुणीमपहाय मासुराङ्गीं
रसिकानां जरतीरतिः कुतस्त्या ॥

नटी ॥ को एसो वेहुखग्गपदाहिहेओ महाराओ ।

सूत्रधारः ॥ भद्राचले श्रीरामभद्रः कयोश्चिद्राजद्म्पत्योस्तपसा प्रसादितः स्वप्ने नन्दकाख्यमात्मीयं खड्गमादिशत् । गीर्णः स एव पुत्ररूपेण पर्यणंसीत् । ततः पितृभ्यां नन्दक इत्यभिहितः प्रतिदिनसमेधमानमूर्तिराशान्तविश्रान्तकीर्तिरवर्तिष्ट ।

नटी ॥ (सप्रत्यभिज्ञम्) अय्य जोखु सअलमिलिच्छचक्कवट्टिपबलवलावलेपविपडाडविप्पज्जलीदकसणवत्तीक्किदणि भसु अमहापदावोत्ति घणनिदरणगुणमिलाविदकप्परुक्खपहावोत्ति असेसदिसावआमे सुगुणीअदि । किं सोचिअ एसो अचरिअं । अय्यउत्त किंणामहेअं एदं रूवअं ।

सूत्रधारः ॥ कलावतीनन्दकमिति ॥

नटी ॥ अय्यउत्त दाणिं णट्टसामग्गी फलिदव्व ।

सूत्र ॥ (सहर्षम्) ।

परिषदियमभिज्ञा पक्षपातानभिज्ञा
सरजसमकरन्दस्यन्दिसूक्तिप्रबन्धा ।
परिमलितदिगन्तः पुष्पगन्धैर्वसन्तः
श्रमोनभिराधिनेता तद्विधातेष्टदाता ॥

End:

त्रिका ॥ (समन्दस्मितं क्षणमात्रं ध्यानमभिनयन् ।)

अनन्यसुलभा विद्या निरवद्येयमस्तु ते ।

सानुप्लवेन भवता सनाथीक्रियतां पुरी ॥

राजा ॥ परमनुगृहीतोऽस्मि ॥

त्रिका ॥ (सानन्दम् ।) राजन् किन्ते भूयः प्रियमुपहरामि ।

राजा ॥ (सादरपरितोषम्)। यदि मम स्वामी भग-

वान् प्रसन्नः किमतः परं प्रियमस्ति ।

तथापीदमस्तु भरतवाक्यम् ।

ब्राह्मं तेजः कल्पतां क्षत्रियाणां

गुणैः क्षात्रं सन्ततं ब्राह्मणानाम् ।

यद्वेदानामिन्दुमौलेः परत्वं

निःसन्देहं तत्सतामाविरस्तु ॥

Colophon:

इति निष्क्रान्ताः सर्वे ॥

सप्तमोऽङ्कः ॥

Subject: Kalāvatīnandaka. 1-7 acts.

Remarks:—The Ms is in good condition. On the title page is found तुलजभूपकृत.

जयसंवत्सरे फाल्गुने मासि विरचितमिदं मुद्राराक्षसनाटकव्याख्यानं

जीयादित्यर्थे ।

Remarks:—The Ms. is in good condition.

॥ मुद्राराक्षसव्याख्या ॥

4477. MUDRĀRĀKṢASAVYĀKHYĀ.

Burnell's Catalogue No 5168. Page 171. Left column. Substance—Paper. Size—10¼×4½ inches. Sheets—159. Lines—8 to 15 to a Page. Script—Devanāgarī No. of Granthas—2700 Author—Ḍhuṇḍhirājavyāsayajvan. Complete.

Beginning, end, colophon and subject—Same as No. 4475.

Remarks:—The Ms: is in a fairly good condition After the colophon is given

कर्माख्यः सूत्रधारो बहुविधजननीगर्भनेपथ्यमध्या

त्रिःसार्धशेषवेषैः शिव तव पुरतो नैकधा नर्तयन्माम् ।

हन्त श्रान्तोऽस्मि नृत्तादुपरतिमधुना याहि मुद्रेति यद्वा

वाक्यात्रं पारितोषं दिशसि यदि विभो तावता स्यां कृतार्थः ॥

॥ मुद्राराक्षसव्याख्या ॥

4478. MUDRĀRĀKṢASAVYĀKHYĀ.

J. L. Collection No. 644 Substance—Paper. Size—13×5

inches. Sheets—37 (2-38). Lines—12 to a Page. Script—Devanāgarī, No. of Granthas—1200. Author—Ḍhuṇḍhirāja Incomplete. Wants beginning.

Beginning:

........रूपमुद्राख्यकं बोद्धव्यम् । अत्र रक्षस्येनं तु मुखयोग इति "स्वेतिवृत्तसमं वाक्यमर्थे वा यत्र सूचिषः ।" इति लक्षणात् ॥

End, colophon and subject—Same as No 4475.

Remarks:—The Ms. is in a fairly good condition.

॥ मुद्राराक्षसव्याख्या ॥

4479. MUDRĀRĀKṢASAVYĀKHYĀ.

T. S Collection No 726. Substance—Paper. Size—7¾×5 inches. Sheets—57. Lines—10 to 12 to a Page. Script—Devanāgarī No. of Granthas—900. Author—Ḍhuṇḍhirāja Incomplete. (*First act only.*)

Beginning and subject—Same as No 4475.

End.

इत्थं पत्रबिन्दुसंबन्धरूपः प्रतिमुखसन्धिः । बिन्दुप्रयत्नानुगुण्येनास्य संधेः त्रयोदशाप्यङ्गानि च यथामति योजितानीति सूक्ष्मदृष्टिभिरवधाय सन्तोष्टव्यम् ॥

॥ इति निष्क्रान्ताः सर्वे ॥

Colophon:

प्रथमोऽङ्कः ॥

इति श्रीत्र्यम्बक + प्रथमोङ्क

Remarks:—The Ms. is in a fairly good condition

॥ मुद्राराक्षसव्याख्या ॥

4480. MUDRĀRĀKṢASAVYĀKHYĀ.

Burnell's Catalogue No. 5160. Page 171. Right column. Substance—Paper. Size—8¾ × 5 inches. Sheets—42. Lines—14 or 15 to a Page. Script—Devanāgarī. No. of Granthas—420. Author—Ḍhuṇḍhirājavyāsayajvan. Incomplete.

Beginning—Same as No. 4475.

End: Ends with the end of the second act

Subject: Mudrārākṣasavyākhyā. First two acts only.

Remarks:—The Ms. is in a fairly good condition. Text also is given herein.

The first verse found in No. 4475 is missing herein.

॥ मुद्राराक्षसव्याख्या ॥

4481. MUDRĀRĀKṢASAVYĀKHYĀ.

T. S. Collection No. 728. Substance—Paper. Size—7¾ × 5 inches. Sheets—29. Lines—12 to 18 to a page. Script—Devanāgarī. No. of Granthas—275. Author—Ḍhuṇḍhivyāsa. Incomplete.

Beginning:

भद्दभटपुरीमदन्तडिंगरातवलउचराअमेण मावुराअंण-
रोहितल्लवत्तिजयवम्भप्पङ्गुहेहिं संजमीअ गहीदोमलब-
केद् ॥

End and colophon—Same Nos. as 4475 and 4476.

Subject: Mudrārākṣasavyākhyā. 7 acts.

Remarks—The Ms is in a fairly good condition.

॥ मुद्राराक्षसव्याख्या ॥

4482. MUDRĀRĀKṢASAVYĀKHYĀ.

T. S. Collection No 727. Substance—Paper. Size—7⅜ × 5 inches. Sheets—22 Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—800. Author—Dhuṇḍhirāja. Incomplete.

Beginning

अथ फलागमकार्ययोः सम्बन्धो निर्वहणसन्धिः त्रिभिरङ्गैरारभ्यते ।

End:

कञ्चुकी । (आत्म) । कथं निरुपपदमेव चाणक्यमिति । नार्यचाणक्यमिति । कथं सङ्गृहीतोऽधिकारः । अथवा न खल्वत्र वस्तुनि दैवदोषः ॥

Subject Mudrārākṣasavyākhyā

Remarks—The Ms. is in a fairly good condition.

॥ मुद्राराक्षसव्याख्या ॥

4483. MUDRĀRĀKṢASAVYĀKHYĀ.

J. L Collection No 615 Substance—Paper. Size—10 × 3¾ inches Sheets—9 Lines—8 to a Page. Script—Devanāgarī No of Granthas—200 Author—? Incomplete.

Beginning:

श्रीमद्विशाखदत्तीये मुद्राराक्षसनाटके ।

कथोपोद्घातमाचक्षे संविधानावबुद्धये ॥

End:

जातवेदा इवार्चिष्मान् वेदान् वेदविदां वरः ।
योऽधीतवान् स चतुरः चतुरोऽप्येकदेशवत् ॥

Colophon: Nil.

Subject: Mudrārākṣasavyākhyā Upodghāta only.

Remarks:—The Ms. is in a fairly good condition.

Is this work by Ghanaśyāma ?

॥ मुद्राराक्षसव्याख्या ॥

4484. MUDRĀRĀKṢASAVYĀKHYĀ.

T. S. Collection No. 737 a. Substance—Paper. Size—7¼ × 5 inches. Sheets—16. Lines—11 to 12 to a Page. Script—Devanāgarī. No. of Granthas—270. Author—? Incomplete.

Beginning:

अथ राक्षसकृतोपायवृत्तान्तकथनाय प्राप्त्याशापता-
कासम्बन्धरूपो गर्भसन्धिः द्वितीयेनाङ्केनारभ्यते ॥

End:

अम-च । स एव्व भण्डाआरे ठाविदुं जदो ॥

Subject. Mudrārākṣasavyākhyā Second act.

Remarks:—The Ms. is in a fairly good condition.

॥ मुद्राराक्षसव्याख्या ॥

4485. MUDRĀRĀKṢASAVYĀKHYĀ.

T. S. Collection No. 737 b. Substance—Paper. Size—7¼ × 5

inches. Sheets—6-14. Lines—13 to a Page. Script—Devanāgarī. No. of Granthas—150. Author—? Incomplete.

Beginning:

करीअदि ॥ आकाशलक्षणं पूर्वमुक्तम् ॥

आर्याः किं भणथ । किंणिमित्तं अपसारणा क्रियत

इति ॥

End:

अत एव मन्दर्धीरिति विशेषण....समासः ।

तस्मात्सचिवादपक्ष.... ।

Remarks:—The Ms. is in a fairly good condition.

॥ यतिराजविजयम् ॥

4486. YATIRĀJAVIJAYAM.

Burnell's Catalogue No. 10698. Page 171. Right column. Substance—Palm leaf. Size—$14\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves —88. Lines—5 to a Page Script—Grantha. No of Granthas—1500 Author—Varadācārya or Varadarāja. Complete.

Beginning:

हरिः ॐ । यतिराजविजयम् ॥

पद्मे त्वच्छयने स्मरामि सततं भावो भवत्कुन्तले

नीले मुह्यति किं करोमि महितैः क्रीतोऽस्मि ते विभ्रमैः ॥

इत्युत्स्वभवचो निशम्य स रुषा निर्भर्त्सितो राधया

कृष्णस्तत्परमेव तद्यपदिशन् क्रीडानिंद:(टः) पातु नः ॥ १ ॥

(नान्द्यन्ते)

सूत्रधारः ॥

*   *

अस्ति खलु समस्तकलास्वद्वितीयो द्वितीयो मे देहः । (नेपथ्याभिमुखमवलोक्य) मारिष, परिषदि पौरुषं ते किं न दर्शयसि ।

*   *   *   *

सूत्रधारः— संप्रति समयसमयस्य *

कावेरीमध्यमरतकमणिभूषणस्य, विभीषणाराधितपादपङ्कजस्य, भुजङ्गराजभोगपर्यङ्कशायिनः, श्रीरङ्गराजस्य चैत्रोत्सवयात्रा(या)मात्मविद्याविदग्धैरन[व]द्यभरतविद्याविनोदैरार्यमिश्रैरादिष्टोऽस्मि ॥ यदुत अस्ति खलु भगवद्रामानुजमुनेः पूर्वाश्रमभागिनेयः श्रीवत्सकुलचूडामणिः अखिलपरदर्शनमदकर्शनः सुदर्शनो नाम । *

तस्य वेदान्तकूटस्थः पौत्रोऽभूद्वरदो गुरुः ।
श्रुतप्रकाशिकाद्याश्च ग्रन्था यच्छिष्यसंपदः ॥

तस्य पञ्चमः प्रपंचविदुर्षं (विद्वद्दि)दितवैदुष्यः काञ्चीपुरवास्तव्यः श्रीघटिकाशतक(वि)सुदर्शनाचार्यसूनुः श्रीवेदान्ताचार्यरामानुजस्थापनाचार्ययोः प्रसादभूमिः वरदराजो नाम कविः ॥ तद्विरचित-

वेदान्तविलासं नाम नाटकमस्माकं श्रोत्रपदवीमा(मन्)दयति । तेन नेत्रपदवीमप्यानन्दयस्वेति ।

पारि ॥ (विचिन्त्य) तदभिनेतव्यमित्युक्तम् ।
भवतु नाम । किन्नाम नाटकस्य ।

सूत्र ॥ विमृश्य,

चित्रकूटतटे रामश्चित्रपा(धा)री चकार यत् ।
सीताललाटे तन्नाम स्वरसं सिद्धमेव तत् ॥

नटः ॥ (विचार्य सहर्षं) ललाटे कृतं हरितालतिलकमेव । तस्य स्वैर्यातिराजाविजयामिति संसिद्धमेव तन्नाम ।

सूत्र ॥ साधु सम्यक्प्राज्ञोऽसि ।

सूत्र ॥ (श्रुत्वा सहर्षं) अहमप्यधुना संभूय तदनुसन्धास्यामीति निष्क्रान्तः ॥

प्रस्तावना ॥

End:

तथापीदमस्तु भरतवचनम् ।—

काले वर्षतु वासवः क्षितिभुजो रक्षन्तु सम्यङ्महीं
सर्वे सन्तु निरामयाश्च कविनः सत्वेरा।(सत्वोत्तरा।)
प्राणिनः ।
पुण्या लोकमिमं पुनातु भगवद्भक्तिश्चिरस्थायिनी
मालायथविशेखरस्य विहरत्वाज्ञा नृणां मूर्धसु ॥

इति हर्षं नाटयन्तो निष्क्रान्ताः सर्वे ।

नीतो मयाद्य निगमान्तमदद्विपोऽयं
रंगस्थलं रचितनाटकसंविधानम् ।
नित्यं निरङ्कुशगतिर्निजसूत्रमार्गे
किंचिद्यदि स्खलति सह्यमिदं सदस्यैः ॥


श्रीघटिकाशतकश्रीमद्वरदाचार्यविरचिते वेदान्तविलासापर-
नाम्नि यतिराजविजये षष्ठोऽङ्कः ॥

श्रीमते रामानुजाय नमः । श्रीगुरुभ्यो नमः । शुभमस्तु ॥

Subject: Yatirājavijayanāṭakam also called Vedāntavilāsa-nāṭakam. 1-6 acts. Complete.

Remarks:—The Ms. is in a fairly good condition, and much worm-eaten.

This drama, Yatirājavijaya, otherwise called Vedāntavilāsa was composed by Varadarājakavi who was a native of Kāñcīpura. The following particulars can be gathered of the ancestry of the author;—



The last Varadācārya is the author of present work.

The work deals with the life story of Rāmānujācārya the founder of the modern school of Viśiṣṭādvaita. The work is not available in print.

॥ रघुनाथविलासम् ॥

4487. RAGHUNĀTHAVILĀSAM.

Burnell's Catalogue No. 5240. Page 171. Right column.
Substance—Paper. Size—10¼ × 4⅜ inches. Sheets—79.
Lines—9 to 11 to a Page. Script—Devanāgarī.
No. of Granthas—1600. Author—Yajñanārāyaṇadīkṣita.
Complete.

Beginning:

श्रीगणेशायनमः ॥

देवीं यो लभतेऽस्म वारिधिभवां दिव्यश्च यो वा मणिं
प्राहं सा ग्रहमञ्जसा प्रहकृते भित्वा च सत्वाधिकम् ।
यः सारङ्गमरक्षदक्षकृपाव्यापारतस्तादृशो
राजत्यम्बुजलोचनो भुवभवत्रङ्गस्थलाभ्यन्तरे ॥ १ ॥

* * *

(नान्द्यन्ते)

सूत्रधारः ॥ (परिक्रम्यावलोक्य च ।) (सहर्षम्)

कवनरससुधायाः कापि पानीयशाला
बुधविविधकलानां बोधिका पूर्वसन्ध्या ।
अभिनयविभवानामास्तिकी जीवनाडी
जयति परिषदेषा जन्मभूमिर्गुणानाम् ॥

(पुनर्निरूप्य)

अस्याङ्किल निखिलशैलूषजनपस्याङ्कुरितसान्द्रिटिकबुध-

समष्टिसमधिष्ठितायां युधिष्ठिरपुरुकुत्सनहुषनैषधमरुतमरु-
चनयययातिभरतभगीरथपरिक्षित्प्रमुखमहीक्षित्प्रभावपरि-
भावकबाहार्गल * * सङ्गीतसाहित्यमङ्गीसौहित्यनिर्मा-
णकर्मान्तिकप्रबन्धशतनिबन्धनामन्दधौरन्धर्यधिषणासना-
थो रघुनाथजनाधिनाथो मणिघोरणीरचितचुमणिघृणिगर्व-
मुद्रासनमधिवसति भद्रासनम् ॥

* * *

नाट्याचार्यः ॥ सखे नटकेसरिन् राजाभिमतं सम्यगू-
हितं भवता ॥ तच रघुनाथविलासं नाम नवनव-
रसोद्धाटकं नाटकम् ॥

नटः ॥ आर्य नाट्याचार्य नाम्नैव तस्य नायकः सकलक-
लाकलापकुशलरघुनाथनरपालोऽयमित्यूह्यते । तस्य ता-
दृशः को वा कवयिता ॥

नाट्याचार्यः ॥ (अङ्गुल्या निर्दिशन्)।

अस्य श्रीरघुनाथभूवलरिपोरध्यासिताध्वासनः
प्रज्ञावैभवखण्डितप्रतिवदत्पाषण्डषण्डस्मयः ।
कुर्वन्न्याक्रियया तिविश्रुततरं कौमारिलं दर्शनं
गोप्ता नित्यगवीरसौ विजयते गोविन्दयज्वाग्रणीः ॥

* * *

चत्वारः कृतसर्वतोमुखमहासत्रेण गाढं खिला-
यूपा येन निखानिताः प्रतिदिशं युक्तं चिरावस्थितेः ।
सौराज्यं रघुनाथभूमिपतिना सम्मेषिते क्ष्मातले
पारे सप्तसुतं वृषेण यशता पादा इव स्थापिताः ॥

* * *

नटः ॥ समश्रोपि च पुरा त्रैस्रोतसप्रवाहपवित्रितायां तस्यां वाराणस्यां वमतामेन सत्तां प्रत्याह । तत्कृतहिरण्यगर्भतुला-पुरुषादिमहादानप्रतिग्रहनिरर्गलविभवागमानुदिवसप्रशंस नादासवाजपेयनाम्नि सप्ततन्तुवरे निरन्तरे क्षणकुतूहलिना-रघुनाथभूतलवलद्विपा सहस्रेष्टकचितश्येनचयनस्य प्रती-ष्टकमध्वर्येव मकलाध्वरक्रमनिधे विप्युक्ता दक्षिणा दापि-तेति ॥

* * *

तत्रभवता रघुनाथभूभृता शिक्षित इत्यनेनैव तावद-स्यापि कवयिता यज्ञनारायणयायजूक इति जानामि , यो वा रघुनाथभूविजयसाहित्यरत्नाकरयोः काव्य-योः कर्ता

* * *

ना ॥ प्रागेव वर्णिता सा वकद्रद(?)विद्वदवतंसायितवचसा विधुतालङ्कारिकविबुधाहङ्कारेण कृष्णयज्वना ॥

तथाहि ॥

द्राक्षामद्राक्षमिक्षुद्रवमपियमपां क्षोद्रमक्षुद्रमादं
मोचामाचाममुच्चैः कथितमदपयःशर्करामप्यचर्वम् ।
तानि श्रीयज्ञनारायणमखिवरवाङ्मौखरीवैखरीभि-
र्मायन्ते यातयामान्यमृतमपि यो नन्दितुं निन्दितुं वा ॥

॥ किञ्च ॥

डिण्डिमकुलमण्डनेन पण्डितशिखामणिना सोमनाथेन ॥ तथा हि ॥

अमृतमृगमदादीन्याद्रियन्तां वरकाः
कतिचन करणानां शर्म निर्मातुकामाः ।
अपि तु वयमपारां यज्ञनारायणोक्त्या
निखिलकरणनाडीनिर्वृतिं कल्पयामः ॥

नटः ॥ अस्ति श्रूयते ॥

नाट्याचार्यः ॥ सखे नटकेसरिन्नत्याश्चर्यकारी खलु बुद्धिमत्ता भवतः । यदहं वासिष्ठकुलसौष्ठवकृते कृतावतारं गोविन्दमखीन्द्रं निर्दिश्य तस्य तनुजोऽयमिति पार्श्ववर्तिनमेनं कवीन्द्रं यावन्न निर्दिशामि ततः प्रागेव देशान्तरेषु तत्प्रसिद्धिमाकर्णितवता भवता प्रकृते विविक्तमनुक्त एवायं यज्ञनारायणयायजूको विज्ञकुलशेखरः पादाङ्गदादिनृपसाधारणभूषणविभूषितः सदसि स एवायमिति प्रत्यभिज्ञाता कवयिता

*   *   *

कुत्रापि नाटकस्य कर्ता नायकोऽप्युभावेकसभावास्थितौ मयेत्थमभिनयसमये न दृष्टचराविति विस्मयातिशयेन विस्मृतवानस्मि ॥

End:

प्रति ॥ (नायिकया दत्तासाभरणं धारयन्ती ।) वत्स विजयकेतो किन्ते भूयः प्रियमुपहरामि ॥ किमतः परमपि प्रियमस्ति ॥ तथापीदमस्तु भरतवाक्यम्

आचन्द्रतारकमसावचनीमशेषा-
मम्भोनिधानरशनामवदातकीर्तिः ।
रत्नाङ्गदेन सदृशं रघुनाथभूमी-
जानिर्वहन् भुजतरे जयतु प्रहृष्टः ॥

इति निष्क्रान्ताः सर्वे ॥

Colophon:

इति षड्वाक्यप्रमाणपारावारपारीणश्रीमदद्वैतविद्याचार्यसाग्निचित्यसर्वतोमुखातिरात्रसाग्निचित्याप्तवाजपेययाजी गोविन्ददीक्षितवरनन्दनस्य श्रीयज्ञनारायणयज्वनः कृतिषु रघुनाथविलासनाम्नि नाटके पञ्चमोऽङ्कः ।

Subject: Raghunāthavilāsa 1-5 acts

Remarks:—The Ms. is in a good condition.

Yajñanārāyaṇa Dīkṣita, the author of the present drama is already known to us as the author of the Sāhityaratnākara. (See No. 4221). The Raghunātha Vilāsa was composed by him in honour of his patron Raghunātha Nāyaka, King of Tanjore who was ruling in the beginning of the 17th century.

The work is not available in print

॥ रतिमन्मथम् ॥

4488. RATIMANMATHAM.

J. L. Collection No. 646. Substance—Paper. Size—6 × 4¼ inches Sheets—90. Lines—10 to a Page. Script—Devanāgarī No of Granthas—1100 Author—Jagannātha Complete

Beginning:

साकूताः शशिशेखरे सुरसरित्याविष्कृतानादराः
स्मेरा भृङ्गिरिटावनन्यशरणे दीने दयामंदुराः ।
वात्सल्यप्रचुराः प्रसूनविशिखे रत्यां प्रसादोचराः
कल्याणानि तरङ्गयन्तु जगतां मातुः कटाक्षाङ्कुराः ॥

॥ नान्यन्ते सूत्रधारः ॥

(नेपथ्याभिमुखमवलोक्य) आर्ये समिपेहि तावत्

(प्रविश्य नटी ॥)

नटी ॥ अय्य एसं हि णिओअणिआ ।

सूत्र ॥ आर्ये नन्वस्यास्तञ्जनगरकंजावकलहंसगुच्छो भावुकजनभावुकवितरणकल्पवल्ल्याखिलोकमातुरा नन्दवल्ल्यास्तावद्दसन्तोत्सवे ससन्तोषमशेषदिगन्तोपसेदुषाममीषां रसिकविदुषामनुरञ्जनानुरूपं किंमिव रूपकमिति निरूपयतोऽपि चिराय न विभाम्यति मे चेतः ॥

* * *

सू ॥ आर्ये शृणु तावत् ।

शब्दाडम्बरसस्पृहाः कतिपये केऽप्यर्थनिर्बेधिनः
केचित्तद्वितयोत्सुकाः वशयितुं शक्यः प्रजाना धर्मा ।
पश्चाद्रसिका रसोचरगुणग्रामाभिरामां परं
श्लाघन्ते फणिति भवेन्न सुकरं तेषां समाराधनम् ॥

॥ किञ्च ॥

नवनवसुदग्विलासैर्नन्नूतुक्ताः कामिनो यथानुदिनम् ।
एवमपूर्वासु (कृति)ष्वादरवन्तो हि रसयितारः ॥ २ ॥

* * *

यदत्र कण्ठवर्तिन्यपि सुवर्णाभरणे निखिलगुणमृङ्गाटके रतिमन्मथनाम्नि नाटकेऽन्यतो गवेष्यते ॥

सू ॥ (सपरितोषम्) । आर्ये दीयतामवधानम् ।

अन्येन्द्रं जगदस्थितेन्द्रमपि वा कर्तुं प्रगल्भेऽन्वये
सम्भूतो ननु बालकृष्णसचिवोत्तंसस्य रूपान्तरम् ।
लक्ष्म्यम्बाहृदयाब्धिशीतकिरणो लोकेऽभिगम्यः सता-
मस्तिन्यस्तपदो गुणैरिह जगन्नाथाभिधानः कविः ॥

* * *

सूत्र ॥ * अहमेव सह मारिषेण सनर्मसचिवस्य मन्मथस्य समाददे नैपथ्यम् । आर्यापि रत्याः ॥

॥ प्रस्तावना ।

End

तथापीदमस्तु भरतवाक्यम् ॥

मोदन्तां हतशात्रवाः चिरतरं धात्रीश्वरा धार्मिकाः
स्वैरोन्मीलितसस्यजातसुभग वर्षन्तु धाराधराः ।
वीरोदारसुधीगृहेषु विहृतिं बध्नातु पद्मालया
चातुर्वर्ण्यमपि स्वधर्मनिलय नित्योत्सवैरेधताम् ॥

॥ इति निष्क्रान्ताः सर्वे ॥

॥ श्रीदेव्यर्पणमस्तु ।

Colophon:

इति जगन्नाथपण्डितकृतौ रतिमन्मथे नाटके पञ्चमोऽङ्कः ॥

सम्पूर्णमिदं नाटकम् ॥

श्रीरामचन्द्राय नमः ॥ श्रीगुरुभ्यो नमः ॥ श्रीवेदव्यासाय नम ॥

युवाभिधाने शरदि शरत्कार्तिकशुक्लके ।

तृतीयायां भृगोर्वारे लिखितं पुस्तकं त्विदम् ॥

बादरायणगोत्रोत्पन्नस्य जीवाजीवन्तरयेदम् ॥

श्रीकृष्णार्पणमस्तु ॥

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ॥

तैलाद्रक्ष जलाद्रक्ष रक्ष मां परहस्ततः ।

मूर्खहस्ते न दातव्यमेवं वदति पुस्तकम् ॥

Subject: Ratimanmathanāṭaka 1-5 acts.

Remarks:—The Ms. is in good condition.

Jagannātha, the author of this drama, Ratimanmatha, was a native of Tanjore and different form his namesake, the author of the Rasagaṅgādhara and other works. He is probably identical with the author of the Śarabharājavilāsakāvya, described under No. 4241.

The drama deals with the union between Rati and Manmatha. The drama is unpublished.

॥ रतिमन्मथनाटकम् ॥

4489. RATIMANMATHANĀṬAKAM.

J. L. Collection No 647. Substance—Paper. -Size—12¼ × 5¾

inches Sheets—9 Lines—13 to a Page Script—Devanāgarī No. of Granthas—225 Author—Jagannātha Incomplete

Beginning—Same as No 4488

End

धारिका ॥ (सशिरःकम्पम्) । सहि उववण्णं

खु एद । तासइ अयविलंबिदं अप्पणो समीहिद । अह

विजहणिओअं अणुट्ठइसम् ।

(इति निष्क्रान्ता सर्वे)

॥ प्रवेशकः ॥

Colophon (Sheet No. 8)

इति प्रथमोऽङ्क ॥

Subject Ratimanmathanāṭaka 1-2 acts

Remarks —The Ms is in good condition This Ms abruptly ends with the beginning of the second act

---

॥ रत्नकेतूदयम् ॥

4490. RATNAKETŪDAYAM

Burnell's Catalogue No 10697 Page 172 Right column Substance—Palm leaf Size —15×1 inches Leaves—41 Lines—6 to a Page Script—Grantha No of Granthas—900 Author—Bālakavi Incomplete

Beginning

.. जयाय निर्गतो नाद्यापि प्रतिनिवृत्तो रत्नकेतुस्तदिदानीमसुकरः परिषदादेशः * *

अस्ति खल्वस्मदन्वं रत्नकतूदयं नामापूर्वं नाटकम् *

* अस्ति तुण्डीरमण्डलमण्डनायमानमूलाण्डं नाम महानग्रहारः ।

तत्र पित्रतिथिदेवतार्चकाः
श्रोत्रियाः सुमतयो बहुश्रुताः ।
कर्णलेह्यकवितासुधोर्मिका
भासुरा............भूसुराः ॥

तेषु च त्रिकरणविशुद्धस्य सामशाखाध्यायिनो भरद्वाजकुलपरिष्कारस्य यौवनसरस्वतीतनूज....मनोजवसस्य ....मनीषिणः पुत्रो विचित्रवाग्विस्तरस्य कालहस्तिककेरात्मसम्भवः कमलसंभवकुटुम्बिनीपरिचरणशीलो बालकविः कस्य...सीमानमवतीर्णः ।

* * *

सौन्दर्यद्रविणौघकोशवसते सौजन्यरत्नाम्बुधे
धीराग्रेसर रामवर्मनृपते जीयाः सहस्रं समाः ॥

इति । अनन्तरं तेन सरसकवितागोष्ठीकृतकालक्षेपेण महाराजेन रत्नकेतूदयं नाम नाटकं भवता नवं निर्मायतामिति मुदा नियुक्तः.... ।

End :

विदूषकः ॥ कहिं गदो दासी एपुत्तओ सोणहअरो ॥
(सर्वाः सकौतुकं विदूषकं पश्यन्ति)
सख्यौ ॥.......................

Colophon : Nil.

Subject Ratnaketūdaya 1-3 acts

Remarks —The Ms is in a very much decaying condition. There is a loose leaf containing the following

भजे वेतण्डवदनं चण्डभानुनिभद्युतिम् ।
विघ्नदण्डप्रचण्डं तु शैलेश........ ..... ॥

....सन्तत वदने मम ।
ववत्र वारिजतुल्यवक्त्रसदृश कोपारिकमत्रेति मे ।
कालक्षेपणमिन्दुमोचनविधौ रांक्षन् शिवः पातु वः ॥

Bālakavi, native of Mullaṇḍram in the North Arcot district, is the author of this drama He was a contemporary of the famous Uddaṇḍakavi, the author of the Mallikāmāruta Perhaps he is identical with the Bālakavi mentioned by Śrī Nīlakaṇṭha Dīkṣita in the Prastāvanā to his Nalacaritanāṭaka

The work is available in print having been published by the Śrīvidyā Press, Kumbhakonam

---

॥ राघवानन्दम् ॥

4491. RĀGHAVĀNANDAM.

Burnell's Catalogue No 10C82 Page 172 Left column Substance— Palm leaf Size – 16×1¾ inches Leaves—94 Lines—6 or 7 to a Page Script—Grantha No of Granthas—2000 Author—Venkateśvara Complete

Beginning

श्रेयांसि प्रतनोतु वे कुवलयश्रीबन्धुकान्त्युद्गमो
गोविन्दोऽवतरन्प्रसाधनकृते सन्मार्गमासेदुषाम् ।

मध्ये वारिधिदैत्यपुङ्गवहृतामानीय भूयस्त्रयीं
लोकानामभिवृद्धये समुचितो येनात्मभूः स्थापितः ॥

(नान्द्यन्ते)

सूत्रधारः ॥ (कतिचित्पदानि गत्वा) । (पुरोऽवलोक्य) ।
भगवता रङ्गनायिकासनाथेन रङ्गनाथेन परिष्कृताया-
मस्यां सभायामलमङ्गकलापाचरणविलम्बेन ॥

* * *

(नेपथ्याभिमुखमवलोक्य)

मारिष, सर्वतन्त्रस्वतन्त्रस्य षड्दर्शनी सागरनिशाकरस्य
षड्भाषासार्वभौमस्य प्रतिदिनप्रबन्धनिर्माणपरमेश्वरस्य
निध्रुवकाश्यपान्वयपारावारकौस्तुभस्य धर्मराजमनी-
षिणो भागधेयपरिणामेन वेङ्कटेश्वरकविना गृहीतवस्तु
राघवानन्दं नाम नाटकमभिनेतव्यमिति ।

End:

तथापि यदि प्रसन्नो भगवान् इदमस्तु भरतवाक्यम्

वाग्देव्या सममिन्दिरा विहरतां वर्षत्वपो वासवो
लोकस्यास्तु सुखाय नीतिनिरता रक्षन्तु पृथ्वीं नृपाः ।
सत्यज्ञानसुखस्वरूपमनघैरुत्तंसितं वाङ्मयै-
रात्मज्योतिरुदेतु चेतसि सतां यस्मिन्जगत्कल्प्यते ॥

वसिष्ठः ॥ एवं भवतु ।

रामः ॥ (प्रविशामो गृहाभ्यन्तरं मातृजनमानन्दयितुम्)
(परिक्रम्य) ॥ निष्क्रान्ताः सर्वे ॥

Colophon

सप्तमोऽङ्कः ॥

समाप्तमिदं राघवानन्दं नाम नाटकम् ॥

सीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेतश्रीरामचन्द्रार्पणमस्तु ॥ हरि ॐ

श्रीविद्यारामाय नम ॥ श्रीदेव्यै नम । हरि ॐम् ॥

Subject Rāghavānanda 1-7 acts

Remarks —The Ms is in a fairly good condition

The author of this drama, Venkateśvara Kavi is the son of Dharmarāja Dīkṣita of Naidhruvakāśyapagotra, author of Sabhāpativilāsa Nāṭaka which is described under No 4529 He was a contemporary of Śāhaji and Serfoji I (1684-1730 A D)

The work deals with the story of the Rāmāyaṇa It has not been published so far

---

॥ राघवाभ्युदयम् ॥

4492 RĀGHAVĀBHYUDAYAM.

Burnell's Catalogue No 5257 Page 172 Left column
Substance—Paper Size—8¼ × 6 inches Sheets—57
Lines—12 to a Page Script—Devanagari No of
Granthas—1300 Author—Bhagavanta Rāya Complete

Beginning

विधुद्वेल्लितवारिवाहपटलीराजिज्जटाकुन्तलं
कालिन्दीमिलदभ्रसिन्धुविलसत्कालाहिमुक्तास्रजम् ।
स्वान्तोन्मिश्रितकौमुदीलसदिभत्वक्नद्धकौशेयकं
सम्पृक्तं भवभूधरेन्द्रसुतयोर्भूयाद्वपुर्भूतये ॥ १ ॥

(नान्द्यन्ते)

सूत्रधारः ॥ अलमतिविस्तरेण । (पुष्पाञ्जलिं विकीर्य)
(परितोऽवलोक्य) अहो समुज्जृम्भितः खलु अयं
ऋतूनामग्रणीर्वसन्तः । तथा हि ॥

शिशिरः क्लिष्टां भ्रमरीं विरुतैः परिसान्त्वयन्भ्रमरः ।
क्रीडति तया निकामं सुखितः सहकारतरुशिखरे । २ ।

(नेपथ्याभिमुखमवलोक्य)

मारिष ॥ इतस्तावत् ॥

(प्रविश्य)

पारिपार्श्वकः ॥ भाव एषोऽस्मि ॥

सूत्रधारः ॥ अद्य खलु भारद्वाजकुलजलधिकौस्तुभेन त्र्य-
म्बकरायमखिना समारब्धस्य क्रतोर्दिदृक्षया आगतेन
नानादिगन्तवासिना विद्वज्जनसमाजेन सबहुमानमाहूय
समादिष्टोऽस्मि ॥

परि ॥ वैदेशिकोऽस्मीति पृच्छामि
'कः पुनरयं त्र्यम्बकरायमखी नाम' ॥

सूत्रधारः ॥ किं न जानासि ॥ निजगुणगणकुसुमसुर-
भीकृतदिगन्तमेतमपि ॥

* * *

पारिपार्श्वकः ॥ (समत्यभिज्ञम् ॥)

एकदस्माधिपतेरिदंविधगुणः साचिव्यधुर्यः भुवः
प्राज्ञः कश्चिदजातशत्रुसदृशो गङ्गाधराग्राभिधः ।

तैस्तैर्येन निजैरनन्यसुलभैरावर्ज्यमानो गुणै
राचार्यप्रतिपत्तिमेव कलयन्नासीदमुष्मिन्नृपः ॥ ६ ॥

सू ॥ दिष्ट्या जानामि तं महाभागम् ॥ तर्हि तस्यात्मसम्भवं नृसिंहरायमखीति सुगृहीतनामधेयं महानुभावमपि भवान्जानीयात् ॥

पारि ॥ बाढं जाने ॥

* * *

सूत्र ॥ तस्यैवायमनुजन्मा ॥

पारि ॥ ननु तदनुजत्वमेव पर्याप्तं प्रख्यात्यै ।

सूत्र ॥ सत्यमुक्तं भवता ॥

पारि ॥ सम्प्रति यज्ञवाट प्रविष्टोऽहं शालान्तरप्रविष्टमनतीतकौमारमन्यं कमपि यजमानमद्राक्षम् ॥ तं पुनर्जानासि ॥

सू ॥ कथं न जानामि ॥

माचिन्वध्वुर्यो विहितः पितृव्ये
णादृत्य शाहक्षितिपालमौलेः ।
आनन्दनामा विमलप्रसूतिः
पुत्रो नृसिंहाध्वरिणः स एषः ॥ ८ ॥

पारि ॥ भाव कीदृशः परिषदादेशः ॥

सू ॥ तस्यैव त्र्यम्बकरायमखिनः समनन्तरानुजेन भगवन्तरायनामधेयेन सत्कविसार्वभौमेन सम्प्रति प्रणीत राघवाभ्युदयं नाम नाटकमभिनेतव्यमिति ॥

पारि ॥ विद्यमानेषु प्राचामपि रूपकेषु कथं नूतनप्रणीते-
तस्मिन्नेवं परिषदो बहुमानः ।

सूत्र ॥ तदेतत्प्रत्यग्रबद्धाञ्जलिना द्वितीयप्राचेतसेन कुण्डि-
नकुलमण्डनेन रामभद्राध्वरीन्द्रेण विमृश्य सशिरः-
श्लाघमनुमोदितमिति ।

❀ ❀ ❀

पारि ॥ (सहर्षम्) ॥ तदादिश्यन्तां वर्णिकापरिग्रहाय
सर्वे कुशीलवाः ॥

सूत्र ॥ किंन पश्यसि ममायमग्रजन्मा दशरथभूमिकामा-
दाय गृहीतरामलक्ष्मणभूमिकाभ्यां निजकुमाराभ्यामि-
त एवाभिवर्तते । तदावामप्यनन्तरकरणीयाय सज्जी-
भवावः ॥ (इति निष्क्रान्तौ)

॥ प्रस्तावना ॥

End

रामः ॥

दुर्धर्षं तदनुग्रहेण भवता भग्नं धनुः शाम्भवं
दारा रूपजुषः समुन्नतकुलोत्पन्नाः समासादिताः ।
दुर्दान्तः स हतो निशाचरपतिर्लब्धं यशो निस्तुलं
लोका वीतभयाः कृताश्च किमितोऽप्यन्यत्प्रियं मेऽधुना ॥२४॥

तथापीदमस्तु भरतवाक्यम् ।

भवतु विधिवधीश्वरो धरित्री-
मनुसरतु प्रकृतिमजः स्वधर्मम् ।

भवतु कृतिरियं भुवि प्रसिद्धा
भजतु मुदं भगवानपि प्रकामम् ॥
इति निष्क्रान्ताः सर्वे ॥

Colophon:

श्रीमति राघवाभ्युदये रामोद्वाहाभिषेको नाम सप्तमोऽङ्कः ॥
रचितं भगवन्नाम्ना श्रीगङ्गाधरसूनुना ।
राघवाभ्युदयं नाम नाटकं जयति क्षितौ ॥
लेखकपाठकयोः शुभं भूयात् ॥

श्रीतारायै नमः ॥ श्रीरामाय नमः ॥ श्रीरस्तु ॥ हेरम्बाय नमः ॥

Subject Rāghavābhyudaya 1-7 acts

Remarks —The Ms is in good condition

A paper transcript of this Ms is found in this Library. See T. V No 475

Bhagavantarāya, the author of this drama is already familiar to us as the author of the Mukundavilāsakāvya, described under No. 8719 Students of the Maratha History of Tanjore are aware of Bhagavanta and his works

The present drama, which is yet unpublished, deals with the story of the Rāmāyana

---

॥ रुक्मिणीपरिणयम् ॥

4493. RUKMINĪPARIṆAYAM.

Burnell's Catalogue No 10687 Page 172 Right column

Substance—Palm leaf. Size—$15\frac{3}{4} \times 1\frac{1}{2}$ inches Leaves—55 Lines—7 to a Page Script—Grantha No. of Granthas—1500 Author—Varada Complete.

Beginning:

वक्षःसीमनि वामतश्च नयने स्वालौ सदा बिभ्रतः
प्रायेण श्वशुरन्तिके तनयतः श्वथं पदे कुर्वतः ।
यस्यान्तःपुरभूर्भुजान्तरमभूदित्यत्र को वि(स्मयः)
तन्मे पुष्यतु मङ्गलानि विकसत्त्वापिञ्छमिश्रं महः ।

* * *

(नान्द्यन्ते)

सूत्रधारः ॥ (सप्रश्रयम् ॥)

शिरसा धारित एष मया वेलिगोटिकुलतिलकवीरासि-
ङ्गभूपालदेवादेशः । यथा—अस्मत्कुलदैवतस्य भ-
गवतः कोदण्डपाणेर्महोत्सवयात्रायामस्यामस्मत्सौहृ-
दस्नेवधेरात्रेयचूडामणेराखिलकलानटनाविलासरङ्गस्य ता-
तगुरुभागिनेयाप्पयार्यभागधेयस्य वरुणाग्निहोत्रिणो
वरदकवेः कृतिं रुक्मिणीपरिणयाभिधानं नाटकं
प्रयुज्यमानं द्रष्टुमिच्छामि । तत्त्वयाभिनेतव्यमिति ॥

* * *

वसन्तवर्णनं प्रस्तौमि ॥

माधवमुपवनसीमनि लक्ष्म्या योजयितुमिह कृताभ्युदयम् ।
उदिता सुमनो विततिः सैषा सर्वेशयोगमायेव ॥

॥ इति निष्क्रान्ताः ॥

॥ प्रस्तावना ॥

End:

च ॥ किन्ते भूयः प्रियमुपहरामि ।

॥ कृ ॥ तात ॥

निष्कण्टकं कल्पितमिन्द्रराज्यं
विश्वम्भरा वीतभरा बभूव ।
लब्धा च लक्ष्मीरिव रुक्मिणीयं
किमर्थनीयं कृतकर्मणां नः ॥

तथापीदमस्तु भरतवाक्यम् ॥

भावानत्र हरेः प्रकल्प्य ललितान् भक्त्या तदेकान्तया
शृङ्गारप्रणयी कविर्भगवतः श्रीमत्कथावन्त्वभूत् ।
स श्रेयांसि समेतु कृष्णकृपया सर्वैः सुहृद्भिः समं
जीयात्काव्यमिदश्चिराय सुखिनः सर्वेऽपि सन्तु द्विजाः ॥

॥ इति निष्क्रान्ताः सर्वे ॥

Colophon :

सप्तमोऽङ्कः ॥

कंरकृतमपराध क्षन्तुमर्हन्ति सन्तः ॥

Subject Rukmiṇīpariṇayanāṭaka, 1-7 acts

Remarks—The Ms. is in a fairly good condition. This drama of Varadakavi, dealing with the marriage of Rukmiṇī with Śrī Kṛṣṇa has been published by the Nirṇayasāgara Press, Bombay.

॥ रेवतीहल्लाङ्कम् ॥

4494. REVATĪHALĀṄKAM.

Burnell's Catalogue No 10693. Page 173 Left column. Substance—Palm leaf Size—14⅛ × 1½ inches Leaves—56 Lines—5 to a Page Script—Grantha No. of Granthas—900 Author—Puruṣottamadīkṣita. Complete.

Beginning:

यन्नृत्यरङ्गे दैत्यारिधातारौ तालधारिणौ ।
..............र्थं सदेवश्रेयधि...... ।

॥ किञ्च ॥

ज्योतिस्तत्त्वमिदं विभज्य बहुधा नेत्रत्रयी तन्वतो
जामातुर्हिमवत्प्रसिद्धिरपि मे तातस्य सा यास्यति ।
इत्यात्मेशविलोचने करयुगेनाच्छाद्य तिग्मार्चिषी
नेत्रेणेन्दुमयेन तं व्यवतनुते सा स्यान्मृडानी मुदे ॥

(नान्द्यन्ते)

सूत्रधारः ॥ (सहर्षम् ॥)
आकर्णनालोकनयोर्यदस्ति करणद्वयम् ।
तदन्यत्र निराकाङ्क्षं यतस्तदभिनीयताम् ॥

इति किल संकलदिविषदाराधितचरणारविन्दस्य भगव-
तस्त्यागराजस्य यात्राप्रसङ्गेन समग्रायाः परिषदोऽयमा-
देशः ॥

* * *

सूत्रधारः ॥ अपि लास्यलते किमनधीतरेवतीहृला
ङ्कनाटकेव पुनर्व्याहरसि ॥

* * *

अयि किं न जानासि ॥ सकलभूपालमकुटोपलालि-
तवाग्विलासः सर्वभाषासार्वभौमः सुद्देसलग्रामवास्तव्यो
भारद्वाजगोविन्दसुधीनन्दनः श्रीपुरुषोत्तमदीक्षित-
नामा कविः ॥ उक्तश्चैवममियुक्तैः ॥

प्रतिभटविद्वत्काविघटमुसलात्पुरुषोत्तमाध्वरिकचन्द्रात्।
अन्यं न मन्यते नः परिषदि विदुषां विभूषणं हृदयम् ॥

End:

तथापीदमस्तु भरतवाक्यम् ॥

त्रिभुवनगुरोर्धातुर्देवाज्जगज्जयतु श्रिया
खलजनसमारम्भो दूरे बलेन निवर्त्यताम्।
यदभिलषितं भूयः पुम्सां भवेत्तदयत्नतो
मधुरवचसां वाग्व्यापारश्चिराय समेधताम् ॥

ततः समीहितार्थसंविधानकृते निजनगरानुसरणाभि-
लाषिणो मणिकटकतटावरोहणं नाट्यन्ते।

निष्क्रान्ताः सर्वे ॥

Colophon·

पञ्चमोऽङ्कः ॥

Subject: Revatīhalāṅka. 1-5 acts.

Remarks:—The Ms. is in a fairly good condition.

A paper transcript of this Ms. is available in this Library. See T. V. No. 65

The author of this drama is one Puruṣottama, son of Govinda and he belonged to the Bhāradvājagotra. He seems to have been the native of a village called Suṅkesalagrāma.

The work deals with the purāṇic story of the marriage of Revatī with Halāṅka or Balarāma. The work has not been printed so far.

॥ विक्रमोर्वशीयम् ॥

4495. VIKRAMORVASĪYAM.

Burnell's Catalogue No. 5228. Page 172. Left column. Substance—Paper. Size—10¾×4 inches. Sheets—57. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—800. Author—Kāḷidāsa. Complete.

Beginning:

वेदान्तेषु यमाहुरेकपुरुषं व्याप्य स्थितं रोदसी
यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथार्थाक्षरः ।
अन्तर्यश्च मुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यते
स स्थाणुः स्थिरभक्तियोगसुलभो निःश्रेयसायास्तु वः ॥

End:

तथापीदमस्तु भरतवाक्यम् ॥
परस्परविरोधिन्योरेकसंश्रयदुर्लभम् ।
सङ्गतं श्रीसरस्वत्योर्भूतयेऽस्तु सदा सताम् ॥ २४ ॥
इति निष्क्रान्ताः सर्वे ॥

Colophon:

इति श्रीमत्कालिदासकृतौ विक्रमोर्वशीयनाटके पञ्चमोऽङ्कः ॥
समाप्तमिदं विक्रमोर्वशीयं नाटकम् ॥

Subject: Vikramorvaśīyam 1-5 acts.

Remarks:—The Ms. is in good condition. On the title page is given तुळजारासस्येदं पुस्तकम्

This drama of Kālidāsa has been printed several times over. The revised edition of the work with Introduction and Notes by M. R. Kale, Bombay is important.

The work deals with the union of Purūravas and Urvaśi, one of the celestial nymphs

Descriptive No.	Collection No.	Substance	Size inches	No. of Sheets or leaves
4496	B. L. 5229	Paper.	$9\frac{1}{2} \times 4\frac{1}{4}$	87
4497	„ 5230	do.	$9\frac{1}{2} \times 4$	38
4498	„ 5231	do	$10\frac{3}{4} \times 4\frac{1}{2}$	28
4499	„ 5314	do.	$13\frac{3}{4} \times 6$	80
4500	„ 10621	Palm leaf.	$17\frac{1}{2} \times 1\frac{3}{8}$	83
4501	„ 10622	do.	$14\frac{1}{2} \times 1\frac{1}{4}$	29
4502	„ 10623	do.	$19\frac{1}{2} \times 1\frac{1}{4}$	36
4503	T. S. 721	Paper.	$9\frac{1}{4} \times 4\frac{3}{4}$	26
4504	„ 722	do	$9\frac{3}{4} \times 4\frac{1}{2}$	56
4505	B. L. 5233	do.	$9\frac{3}{4} \times 4\frac{1}{2}$	82
4506	„ 5232	do.	$9\frac{1}{2} \times 4\frac{1}{4}$	16

There are several copies of the Vikramorvaśīya in this library and they are tabulated hereunder.

No. of Lines per Page or Sheet.	Script	Complete or otherwise.
10-12	Devanāgarī	Complete.
8	do.	"
10	do.	"
10	do.	"
6 or 7	Grantha	"
7 or 8	do.	"
7	do.	"
15 or 16	Devanāgarī.	"
8	do.	"
10	do.	Incomplete (1-5 Acts, wants end).
9-11	do.	" (1-2 Acts).

॥ विक्रमोर्वशीयव्याख्या ॥

4507. VIKRAMORVAŚĪYAVYĀKHYĀ.

Burnell's Catalogue No. 10624, Page 172 Left column. Substance—Palm leaf. Size—16¾ × 1½ inches Leaves—34 (69-102) Lines—7 to a Page Script—Grantha No of Granthas—1000 Author—Kāṭayavema. Complete

Beginning

वेदान्तेष्वित्यादि ॥ स स्थाणुर्वः निःश्रेयसाय नित्यानन्दायास्त्विति सम्बन्धः । सदातिष्ठतीति स्थाणुः । स्थाणुरित्यौणादिको णुप्रत्ययः ॥ निःश्रेयसमिति "अचतुरविचतुर" इत्यादिनाच्प्रत्ययान्तं निपातितम् । कीदृशः । स्थिरभक्तियोगसुलभः स्थिरो भक्तियोगो येषान्ते तथोक्ताः । तैः सुलभः सुखेन प्राप्यः ॥

End

॥ परस्परेत्यादि ॥ परस्परविरोधिन्योरन्योन्यद्वेषिण्योः श्रीसरस्वत्योर्लक्ष्मीभारत्योरेकसंश्रयदुर्लभमेकस्मिन् संश्रये आश्रये दुर्लभमलभ्यं सङ्गतं सङ्गमः सतां सज्जनानां भूतये ऐश्वर्याय सदा सर्वदा अस्तु त्रियताम् । अत्र शुभशंसनात्प्रशस्तिर्नाम सन्ध्यङ्गमुक्तं भवति ।

इति निष्क्रान्ताः सर्वे ॥

Colophon:

इति श्रीकाटयवेमभूपविरचिते कुमारगिरिराजीये विक्रमोर्वशीयव्याख्याने पञ्चमोऽङ्कः ।

मन्यश्च परिसमाप्तः ॥

अविरल + सन्तः ॥

श्रीगुरुभ्यो नमः ॥ श्रीमहागणपतये नमः ॥

विक्रमोर्वशीयनाटकव्याख्यानं समाप्तम् ॥

Subject: Vikramorvaśīyavyākhyā. 1-5 acts.

Remarks: —The Ms. is in a fairly good condition.

Kāṭayavema's commentary on the Vikramorvaśīya has not been printed so far.

॥ विक्रमोर्वशीयव्याख्यानम् ॥

4508. VIKRAMORVAŚĪYAVYĀKHYĀNAM.

Burnell's Catalogue No. 10625 Page 172. Left column. Substance—Palm leaf. Size—$17\frac{1}{4}\times1\frac{3}{4}$ inches. Leaves —81. Lines—5-7 to a Page. Script—Telugu. No. of Granthas—1000. Author—Kāṭayavema. Complete.

Beginning:

श्रीमत्काटयवेमस्य कृतिर्विज्ञानशालिनः ।
कुमारगिरिराजीयं जीयादाचन्द्रतारकम् ॥ १ ॥

वेदादीनां विशुद्धानां विद्यानां जन्महेतवे ।
पार्वतीपरतन्त्राय परस्मै वस्तुने नमः ॥ २ ॥

जयति विजयलक्ष्मीवल्लभोऽनन्तकीर्तिः
कुमरगिरिनृपालो राजवेश्याभुजङ्गः ।
बिरुदमसहमानो (काटभूपो) यदीयं
भवति विमतवर्गो देववेश्याभुजङ्गः ॥

अविघ्नमस्तु ॥

अत्र कविः कालिदासः प्रारीप्सितस्य ग्रन्थस्याविघ्नपरिसमाप्त्यर्थमिष्टदेवतास्मरणपूर्वकमाशिषं प्रयुङ्क्ते ॥ वेदान्तेष्वित्यादि ॥ स्थाणुः शिवः वः युष्माकं

Same as No. 4507.

End and colophon—Same as No. 4507.

Remarks:—The Ms. is in a most decaying condition.

॥ विक्रमोर्वशीयव्याख्या ॥

4509. VIKRAMORVAŚĪYAVYĀKHYĀ.

J. L. Collection No 648 Substance—Paper Size—8×4¾ inches Sheets—43. Lines—15 to a Page. Script—Devanāgarī. No. of Granthas—1290 Author—Kāṭayavema Complete.

Beginning, end, colophon and subject—Same as No 4507.

Remarks.—The Ms. is in a decaying condition.

॥ विक्रमोर्वशीयव्याख्या ॥

4510. VIKRAMORVAŚĪYAVYĀKHYĀ.

Not noticed by Burnell Ms No. 15540.

Substance—Palm leaf. Size—17¼×1½ inches. Sheets—27(67-93). Lines—9 to a Page Script—Grantha. No of Granthas—1000, Author—Kāṭayavemabhūpāla. Complete.

Beginning, end, colophon and subject—Same as No. 4507.

Remarks:—The Ms. is in a fairly good condition.

॥ विद्यापरिणयम् ॥

4511. VIDYĀPARIṆAYAM.

Burnell's Catalogue No 5224. Page 172. Right column. Substance—Paper. Size—10 × 5⅝ inches. Sheets—70. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—1810. Author—Ānandarāyamakhin. Complete.

Beginning:

सत्यज्ञानसुखाद्वयेऽपि बहुधा रूपाणि बिभ्रच्चिरा-
दप्रज्ञेयविलासवैभवनिजाविद्याविधेयीकृतः ।
आनन्दान्विषयोदिताननुभवन्भूयः स्वया विद्यया
प्रश्लिष्टः परमार्थभोगमुदितः पायादुमायाः पतिः ॥

End:

अस्तु स्वस्ति जगत्रयाय जगतीं रक्षन्तु भूमीभुजो
धर्मेणैव यथा भवन्तु सुखिनः सर्वेऽपि गोब्राह्मणाः ।
पर्जन्याक्रमसत्क्रमेण जगतश्चक्रं तदा वर्तताम्
विद्वांसो विजयीभवन्तु भगवद्भक्त्या त्रयी वर्धताम् ॥
इति निष्क्रान्ताः सर्वे ॥

Colophon:

सप्तमोऽङ्कः ॥

Subject: Vidyāpariṇaya 1-7 acts.

Remarks:—The Ms. is in a fairly good condition.

Ānandarāyamakhin was one of the ministers of the Mahāratha kings of Tānjore. For detailed remarks on Ānanda-

rāya, please refer to the article "Ānandārya Makhin *versus* Appādhvarin" in the Journal of Oriental Research Vol. III.

The present drama is an allegorical one written from the point of view of Advaita Vedānta. The Nirṇayasāgara Press has published the work.

॥ वेणीसंहारम् ॥

4512. VEṆĪSAMHĀRAM.

Burnell's Catalogue No. 5209. Page 172. Right column. Substance—Paper. Size—$10\frac{1}{4} \times 4$ inches. Sheets—90. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—1400 Author—Bhaṭṭanārāyaṇa. Complete.

Beginning:

जयति सनाभिर्जगतां स्वनाभिरन्ध्रोद्भवजगद्बीजः ।
दामोदरो निजोदरगह्वरनिक्षिप्तनिखिलजगदण्डः ॥

End:

तदिदमस्तु भरतवाक्यम् ॥
अकृपणमतिः कामं जीव्याज्जनः पुरुषायुषं
भवतु भगवान् भक्तिर्द्वैधं विना पुरुषोत्तमे ।
दयितभुवनो विद्वद्बन्धुर्गुणेषु विशेषवि-
रसततसुकृती भूयाद्भूयः प्रसाधितमण्डलः ॥

कृष्णः ॥ एवमस्तु ।

इति निष्क्रान्ताः सर्वे ॥

Colophon:

इति षष्ठोऽङ्कः ॥
समाप्तमिदं वेणीसंहरणं नाटकम् ॥

॥ श्रीरामचन्द्रार्पणमस्तु ॥

युवनामसंवत्सर आषाढशुद्धपञ्चमी भानुवासर

Subject: Veṇīsamhāranāṭakam 1-6 acts.

Remarks:—The Ms. is in good condition. On the title page is given 'तुळजारामजस्येदं पुस्तकम्'

The Veṇīsamhāra has as its theme the famous incident of the Mahābhārata where Draupadī vows that she will not tie up her hair which was dishevelled by Duśśāsana unless he were killed and his blood besmeared on her hair.

The work has been printed by the Nirnayasāgar Press, Bombay.

There are several copies of the Veṇīsamhāra in this library and they have been tabulated hereunder.

No. of Lines per Page or Sheet.	Script	Complete or otherwise.
8-10	Devanāgarī	Complete.
8 or 9	do.	"
10	do.	"
10	do.	"
8	Grantha.	"
5-8	do.	"
8	Devanāgarī.	Incomplete (1-5 Acts, wants beginning and end)
9-11	do.	" (1st Act only.)
11-13	do.	" (1-3 Acts, wants beginning and end)
16	do.	" (1-3 Acts, wants end)
6	do.	" (3-4 ")
8	do.	" (2-4 ")
16	do.	" (3-4 Acts, wants beginning)
10	do.	" (3rd ")
18	do.	" (3-6 ")
14	do.	" (2-5 ")

॥ सभापतिविलासम् ॥

4529. SABHĀPATIVILĀSAM.

Burnell's Catalogue No. 10684. Page 174. Left column.
Substance—Palm leaf. Size—15⅞ × 1¼ inches Leaves—155 Lines—4 to a Page. Script—Grantha No. of Granthas—1500 Author—Veṅkaṭeśvara Complete.

Beginning:

वामाङ्कस्तनकुम्भपत्रमकरीविन्यासशिल्पक्रम-
स्विद्यद्दक्षिणपाणि रौद्रकरुणासंवादसीमालिकम् ।
अस्त्रीपुंसनपुंसकाकृति किमप्यानन्दगन्धोर्मिल-
द्दिव्यं तन्मिथुनं तनोतु भवतामानन्दमव्याहतम् ॥

* *

सूत्रधारः ॥ (पुरोऽवलोक्य सानन्दम्) अमी खलु
* करुणावलोकनपरिपालितशरणागतजनततेः कनकसभापतेः यात्राप्रसङ्गेन सन्निहिताः सकलकलाकलासुधाम्बुधि कृतमज्जनाः सज्जनाः। अहो परमानन्दनिदानममीषां दर्शनम् ॥

* * *

सूत्रधारः ॥ (विचिन्त्य) । कण्ठगतमेव सूच्यते चामीकरम् । ननु निर्दिष्टगुणोत्तरं सभापतिविलासं...
मस्मद्वश्यमेव सकलरसमणिगणहाटकपेटकं नाटकम् ॥
तदेतत्प्रयुञ्जानैरस्माभिरा ... रवश्यमवश्यमनेतव्यानि सामाजिकमनांसि ।

नटी ॥ (सकौतुकम्) को णाम कइंदो तारिसस्स पबंधस्स ॥

(को नाम कवीन्द्रस्तादृशस्य प्रबन्धस्य ॥)

सू ॥ आर्ये जानासि सकलकलाकलापपारदृश्वा मणल्लूर-
प्रहारवासि....धर्मराजाभिधानो मनीषी ।

नटी ॥ केणमुणीअदि पडिदिणं पबंधनिम्माणजंमणज्जस(?)
....ररिञ्छोलिआ सुरहिअदसदिसामुहो सअलभूमंडल-
पंडिअमंडिअणिच्चहिज्जविज्जाणडीरंगथलाअंतणाणेंद-
मुणिंदसहासंपत्तअब्भासासव्वहोमावरणामहेओ सो वि-
बुहेंदो, जस्स दव्वीअरसिहामणिभासं जिहंगअसीणि-
हाणं कंपि अंकरिस्स मसइ । अप्पआसविअंममाणासु-
महुरचित्तवित्थअचौविहकइआसंदंसिदचमकारस्स णा-
डअप्पमुहरूपअचित्तेइवुत्त पज्जापहिअमणीसाविसेस-
स्स तस्स को णाम ण सिलाहेइ ॥

(छाया ॥ केन न ज्ञायते प्रतिदिनप्रबन्धनिर्माणजन्मय-
शोधनसाररिंछोलिकासुरभितदशदिशामुखः सकलभूमण्ड-
लपण्डितमण्डितमनित्यहृद्यविद्यानटनरङ्गस्थलायमानज्ञाने-
न्द्रमुनीन्द्रसभासम्प्राप्तसद्भाषासार्वभौमापरनामधेयः
स विबुधेन्द्रः, यस्य दर्वीकरशिखामणिभाष्यं जिह्वा-
प्रकृतसंनिधानं कमप्युत्कर्षं पुष्यति । अप्रयासविजृम्भ-
माणासुमधुरचित्रविस्तरचतुर्विधकवितासन्दर्शितचमत्का -
राय नाटकप्रमुखरूपकचित्रेतिवृत्तपद्यापथिकमनीषाविशे-
षाय तस्मै को नाम न श्लाघते ।)

सूत्रधारः—तत्त्वं बोधितवती । अथ वा ॥

नैतचित्र ललितमधुरं धर्मराजस्य सूरे-
वांचां विस्फूर्जितमिति जगत्ख्यातविद्यावतारः ।
यस्य ज्यायानुपसुरगुरो रामनामा मनीषी
भाष्यं पातञ्जलमुपदिशन्भाति विद्वज्जनेभ्यः ॥

॥ किञ्च ॥

श्रीमन्निध्रुवकाश्यपान्वयमणिर्निर्णीतसर्वागमो
निर्वेलप्रथितान्नदानजनुषा कीर्त्या जगद्भासयन् ।
यज्वातो भुवि वै... सुतो वैकुण्ठयोगीश्वरः
सद्यः संन्यसनेन चिद्घनसुधाम्भोधेरगादेकताम् ॥

तस्य खलु सकलादिगन्तरसन्ततचन्द्रातपायमानय-
शसो धर्मराजमनीषिणो हृदयानन्दनो नन्दनो वेङ्क-
टेश्वरनामा कवीन्द्रः । तेन हि निर्माय नाटकमिदं भग-
वतः पादाम्बुजयोः समर्पितमासीत् ।

End

तथापीदमस्तु भरतवाक्यम् ॥

वाग्देव्या सममिन्दिरा विहरतां चर्पन्नपो वासवो
लोकस्यास्तु सुखाय नीतिनिरता रक्ष(न्तु) पृथ्वीं नृपाः ।
भूयासुश्च चिदम्बरे निवसतां पुष्टानुपुष्टश्रियः
चेतः खेलतु चित्सभापतिपदाम्भोज जनानां सदा ॥

इति निष्क्रान्ताः सर्वे ॥

Colophon

॥ पञ्चमोऽङ्कः ॥

समाप्तमिदं सभापतिविलासं नाम नाटकम् । श्रीमच्चिदम्बरेशाय नमः ।

चिदम्बरेशार्पणमस्तु ॥

Subject: Sabhāpativilāsanāṭaka 1-5 acts.

Remarks:—The Ms. is in a decaying condition.

There is a paper transcript of this Ms. in this Library. See T. V. No. 54.

The author of this drama is Veṅkaṭeśa the son of Dharmarāja of Naidhruvakāśyapagotra. Venkaṭeśa is already familiar to us as the author of the Campukāvya called Bhosalavamśāvali, described under No. 4240 (Vol. VII Pages 3287-91.) The author was a protege of Serfojee who ruled between 1711-1728 A. D.

The work deals with the greatness of Kanakasabhāpati the titular deity of Cidambaram, a famous place of pilgrimage in South India.

The work has not been printed so far.

॥ सीतानन्दम् ॥

4530. SĪTĀNANDAM.

Burnell's Catalogue No. 10666. Page 169. Left column.

Substance—Palm leaf. Size—16×1⅜ inches. Leaves—117 Lines—5 to a Page. Script—Grantha. No. of Granthas—2400. Author—Tātārya. Incomplete.

Beginning:

यस्यानन्दे प्लवन्ते क्वचिदिव कणिका…स्यमाणाः
सर्वेज्ञ(म्बु)स्वयम्भू प्रमुख………………… ।
यं शेषः श्रुतीनां मम हृदि सततं…सन्निधि…रा-
सीताख्य(?)तावलोकैरुपाह्लिरमाहिषा रामनामा श्रियामा ॥

(नान्द्यन्ते)

* *

सूत्रधारः ॥ (विचिन्त्य ।) सकलभुवनतलललामभूतायां * अस्यां कुम्भकोणाभिधानायां महानगर्यां कोमलवल्लीसहचरस्यास्य देवस्य चैत्रोत्सवसेवा समागतैरत्रभवद्भिरा....राकिल पञ्चहायनतया सङ्गतवचनग्रथनानाभिज्ञमपि निजगुणवर्णनसमौत्सुक्येन परिस्फुरदधरपल्लवं व्याहारकौशलमभिधाय च मा.... उत्तानपाददायादमतिवात्सल्येनानुगृह्य सञ्जातहर्षेण तथाविधदयनीयजनलुब्धतया पुनरपि तादृशजनं विच्छता ! भगवता निजकृपापूरकिङ्करेण निगमान्तदेशिककृपाभरेण चिरादासाद्य समर्पिते स्वस्मिन्नेव प्रतिष्ठापितस्य निरवग्रहानुग्रहकल्पावनीरुहस्यातिमनोहरसुमनस्तबकायमानतया कर्णावतंसीभूय देवीहृदयमु(ह्ला)मयिष्यतीति कृताध्यवसायेनैव कविः रामसीतानन्दमिति कलितनामधेयं रसिकजनहृदयाधेयमभिनवं नाटकं............ ॥

* *

सूत्रधारः ॥ * तदवहितमाशृणु ।

श्रीशैलवंशकलशोदधिलब्धजन्मा
सन्मार्गभूषणकरो भुवि शीतधामा ।
आसीदशेषधरणीसुरवासधेरू-
रव्याधवार्यं गुरुराभितवासवद्रुः ॥

किञ्च ॥

साक्षादुपास्यामुपदेष्टुकामी
पूर्वाग्रमागाविव पूर्ववाचाम् ।
यस्य श्रितौ तातकनिष्ठतातौ
श्रीमद्वनाद्रीश्वरतातयार्यौ ॥

अपि च ॥

त्र्यन्तधर्मपरिपालनजागरूक-
माचार्यकं स्वयमिव श्रितमर्त्यभावम् ।
यस्यानुजो समजनि(?)तातगुरुर्धराया-
मौदार्यसम्पदिव मूर्तिमती मुरारेः ॥

तस्य किल तनयो मूर्त इव विनयो रमणीयमृदुलतरव-
चोमङ्गया * तातयार्यनामा प्रबन्धकविः ।
श्रीमत्तिरुमलाम्बा च शिङ्गमाम्बा च मातरौ ।
कारुण्यस्रोतसा चेतः कुर्वाते यस्य निर्मलम् ॥

End:

नटः (सहर्षम्, विलोक्य)

नृत्यन्त्यप्सरसः प्रमोदभरिताः गन्धर्वकन्याः कलं
गायन्त्युन्मदयन्ति सान्द्रनिनदैरन्त...मुखाः ।
केच...भिरञ्चितरवा कुर्वन्ति सर्वा दिशः
सौद्रिं दृष्यति लोककृत्सहगिरा देव्याव रामो म.. ॥
सर्वे कौशिकाद्यया यथार्हं लक्ष्मणार्यैरूर्मिलादीनां... ॥

Colophon: (Leaf No. 101.)

इति तातार्यकृतश्रीरामानन्देऽष्टमोऽङ्कः ॥

Subject: Sītānanda 1-9 acts.

Remarks:—The Ms. is in a decaying condition. This Ms. abruptly ends towards the close of the 9th act. This is full of scriptorial errors.

The author of this drama, Tātārya, belonged to the family of the famous Tātācārya of old. He seems to have been a native of Kumbakonam, wherein the scene is laid. He was the son of one Vanādrīśvara, and seems to have lived in the 17th century.

The drama deals with the marriage of Sītā with lord Śrī Rāmacandra.

The work is not available in print.

॥ सीताविवाहम् ॥

4531. SĪTĀVIVĀHAM.

Burnell's Catalogue No 10665. Page 174. Left column. Substance—Palm leaf Size—15⅞ × 1¼ inches. Leaves—61. Lines—6 to a Page. Script—Grantha. No. of Granthas—1800 Author—Śeṣādri. Complete.

Beginning:

....कोकुपटलीचेतःप्रमोदोत्कर-
स्थेमाङ्कुरसुधारसो क्षणनिजप्रादुर्भवैस्ते करैः ।
प्रातः पङ्कजकोरकस्य,...कृत्वा,द...क्रमा-
देनामेषपतिस्ततः स्ववशयत्वम्भोजिनीनां श्रियम् ॥

(अष्टादशपदा कोकपङ्कजपदवती धन्येति धनुर्भङ्गसूचनं
श्रियं स्ववशयन्निति सीताविवाहसूचनम्)

(नान्द्यन्ते)

सूत्रधारः ॥ (समन्तादवलोक्य, सानन्दम् ।)

अहो रमणीयता वसन्तसमयस्य ।

* * *

भगवतः शार्ङ्गधन्वनो वरदराजस्य वसन्तोत्सवयात्रायामागताना...कमपि रूपकमभिनीयतां भवतेति ।

* * *

सूत्रधारः ॥ (स्मृतिमभिनीय) । अस्ति भारद्वाजकुलकलशजलधिसमुल्लासकरः प्राभाकराध्वरीन्द्र इति कलङ्कं विना पूर्णचन्द्रः ।

* * *

तस्य............ ....

शेषाद्रिनाम्ना कविना प्रणीय ।

सीतापविवाहाभिधनाटकं यत्

न्यस्तं मयि प्राक्तदहं प्रयोक्ष्ये ॥

End :

विश्वा ॥ तथापीदमस्तु भरतवाक्यम् ॥

नृत्यतु देवी वाणी विदुषां रसनाग्ररङ्गमध्येषु ।

अपुनर्भवस्य लक्ष्मीः सिद्ध्यतु मे राघवप्रसादेन ॥

॥ अपि च ॥

देवी सस्यसमृद्धिमेतु वसुधा वर्षन्तु वाञ्छाधिकं

मेघा धर्मरता भवन्तु मनुजा मापे रतिर्मा स्म भूत् ।

भूयात्सौख्यमनारतञ्च विदुषां गोष्ठीषु सक्ता नृपा
जायन्तां धरणीसुराः कृतधियो वेदेषु शास्त्रेषु च ॥
(प्रशस्तिः शुभशंसनम्)
॥ इति निष्क्रान्ताः सर्वे ।

Colophon:

पञ्चमोऽङ्कः ॥
सीताविवाहं नाम नाटकं सम्पूर्णम् ॥

Subject Sītāvivāhanāṭaka

Remarks:—The Ms is in a decaying condition.

Śeṣādri, the author of this drama, mentions one Prabhākarādhvarin in the Prastāvanā Very probably this Prabhākara was an immediate ancestor of the author of the present drama. More about this author is unknown

The drama deals with the story of the marriage of Rāma with Sītā. The work is not available in print

---

॥ सुभद्राधनञ्जयम् ॥

4532. SUBHADRĀDHANAÑJAYAM.

Burnell's Catalogue No 10700 Page 174. Left column. Substance—Palm leaf. Size—10⅜ × 1¾ inches. Leaves —33 Lines—8 to a Page Script—Grantha. No. of Granthas—660 Author—Gururāmakavi. Complete.

Beginning:

श्रीरामाय नमः ॥

शम्भोः पञ्चसु वक्त्रेषु दीप्तिमन्तमयं नुमः ।
अघोरमपि यत्प्राहुरमर्त्या निग्रहक्षमम् ॥

* *

(नान्द्यन्ते)

सूत्रधारः ॥ अहो वेङ्कटगिरेरनुभावः ।

* *

(विमृश्य) अस्ति किल काश्यपगोत्रस्य भगवतो गुरुराम-कवेः कृतिः सुभद्राधनञ्जयं नाम नाटकम् ॥ * *
अस्ति खलु तुण्डीरमण्डले मूलाण्डं नाम महानग्रहारः ।

तत्र केचन वसन्ति काश्यपाः श्रोत्रिया धृतशिवार्चनव्रताः ।
यैरघोरशिवदेशिकादिभिः प्रत्यपादि परतत्त्वमैश्वरम् ॥

सार्वभौमकविप्राग्र्या वश्यवाचो बहुश्रुताः ।
गुणोत्तरतया सर्वे गुरून्सम्भावयन्ति यान् ॥

तेषामन्वयभूषणस्य तनुभूरेष स्वयम्भूर्गुरो-
दौहित्रः कवितानिरूढयशसः श्रीराजनाथस्य च ।
एनामप्यकरोत्कृतिं श्रितगुणग्रामः स रामः कविः
काव्यं कृष्णपरं व्यधाच्छिवपरं चम्पूप्रबन्धञ्च यः ॥

End:

तथापीदमस्तु भरतवाक्यम् ।

सद्वस्तुप्रथनाय तत्रभवतः शिल्पं विधेः कल्पतां
धर्मैकप्रवणार्थकामनिरता धात्रीभुजः सन्त्वमी ।
जायन्तां सुखिताः समग्रविभवारोग्यायुषः साधवः
जिह्वाग्रेषु च रोचनं कवयतां जागर्तु सारस्वतम् ॥

निष्क्रान्ताः सर्वे ॥

Colophon :

पञ्चमोऽङ्कः ॥ हरिः ॐम्

श्रीकृष्णाय नमः ॥

भद्रायास्तु सुभद्रा मे विजयं विजयः क्रियात् ।
बलाय बलदेवः स्याच्छ्रीपतिः कल्पतां श्रियै ॥

सभ्याः कृष्णधनञ्जयोज्ज्वलकृतिं सम्भावयन्त्वं बुधाः
सद्वस्तुप्रणयेन मास्तु भवतां शङ्कोन्मुखं वाङ्मुखम् ।
अस्थाने यदि शङ्कतेयमनघा नान्येव सोढुं क्षमा
कौलीनं कुलदेवकिं कुलवधूं मुग्धा तितिक्षिष्यते ॥

साहित्यैहित्यमर्थप्रभवमभिनवां शब्दसन्दर्भबुद्धिं
व्युत्पत्तेः सिद्धिमग्र्यां विविधरससुधास्रोतसागाधनन्त्वम् ।
चित्रं शौरेश्चरित्रं किमपि रसयितुं चेतसां पारिपार्श्वा.
यथाशंसावतंसी कुरुतं गुरुकुलोत्तंसरामप्रबन्धम् ॥

॥ शुभमस्तु ॥ श्रीरामाय नम. ॥

प्रतीतभाग्येऽत्र गुरुः स्वयम्भुवि
प्रसूतिमासाद्य गुरुः स्वयम्भुवि ।
गुणाभिरामो गुरुरामनामभाक्
प्रसन्नकाव्यप्रणयी तदद्भुतम् ॥

श्रीवाग्देव्यै नमः ॥

अनेकमिष्टानि मदर्थ्यमानो पादौ यतेतां प्रणय. स गुरु (?) ।
अव्याजमव्ग्भिर्मधुधारपूर्ण्यै भातनमस्ते मणिदर्पिकायै ॥

शुभमस्तु ॥

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेतश्रीरामचन्द्राय नमः ॥

Subject. Subhadrādhanañjayanāṭaka 1-5 acts.

Remarks:—The Ms. is in a fairly good condition.

Gururāmakavi the author of this drama, Subhadrādhanañjaya, seems to have been a native of the North Arcot District and contemporary of the famous Appayya Dīkṣita and others. So his date falls in the opening decades of the 16th century.

The work deals with the story of the marriage of Dhanañjaya or Arjuna with Draupadī. The work is not available in print.

॥ सुभद्राधनञ्जयम् ॥

4533. SUBHADRĀDHANAÑJAYAM.

Burnell's Catalogue No. 10886 a. Page 118. Left column. Substance—Palm leaf. Size—$14\frac{3}{4} \times 1\frac{1}{4}$ inches. Leaves—18 (1-18). Lines—6 to a Page. Script—Grantha. No. of Granthas—195. Author—Gururāmakavi. Incomplete.

Beginning—Same as No. 4532.

End :

धतिः ॥ भवद्गुणा एव धर्मनन्दनं महानुभावमनुस्मा-
रयन्ति ॥

कृष्णः ॥ भगवन्

Colophon: (L. 9)

प्रथमोङ्कः ॥

Subject: Subhadrādhanañjaya 1-2 acts.

Remarks:—The Ms. is in a fairly good condition. The Ms. abruptly ends in the middle of the second act.

The other work contained herein seems to be some work on

1. Indian Logic. The opening verse

बालोऽपि यो न्यायनये प्रवेशमल्पेन वाञ्छत्यलसः श्रुतेन ।

संक्षिप्य युक्त्यान्विततर्कभाषा प्रकाश्यते तस्य कृते मयैषा ॥

leads us to think that the work may be Tarkabhāṣāprakāśa.

2. Yogasūtra.

3. Some fragmentary leaves containing the opening portion of the Māgha.

॥ प्रकरणानि ॥

PRAKARAṆAS.

॥ अद्भुतदर्पणम् ॥

4534. ADBHUTADARPAṆAM.

Burnell's Catalogue No. 10699. Page 167. Left column. Substance—Palm leaf. Size—16⅞ × 1½ inches. Leaves—50. Lines—8 or 10 to a Page. Script—Grantha. No. of Granthas—1000. Author—Mahādeva. Incomplete.

Beginning:

हरिः ॐ ॥

श्रेयः श्रियो रसज्ञो
दद्यातु पुरुषोत्तमो भवताम् ।
जागर्ति यः पयोधौ
तादृशतरुणीजिघृक्षयेव पुनः ॥ १ ॥

End:

शूर्पणखा— एव्वं होदु । नेव । अहो बत देवी सीता ।
मदान्धरक्षोगृहवासदोषशङ्कानुसक्तेन रघूद्वहेन ।
त्यक्ता समक्षं महतो जनस्य त्यजत्यहो देहमिदं हुताशे ॥

(प्रविश्य) त्रिजटा, सरमा च—

हाहदीमि मन्दभाय अणि । (मुह्यतः) ।

शूर्पणखा:—सहर्षम्............ ॥

Colophon: (Leaf No. 49)

नवमोऽङ्कः ॥

Subject: Adbhutadarpaṇa 1–10 Aṅkas 10th incomplete.

Remarks:—The Ms. is in a fairly good condition.

This drama has been published by the Nirṇayasāgara Press Bombay. The work deals with the story of the Rāmāyaṇa. Some Ālaṅkārikas and poets have held that Śṛṅgāra is the only sentiment out of which the rest have developed. Few others have given that place to Karuṇa; still others to Śānta. The present dramatist holds that Adbhuta should be regarded as the source of all sentiments. This may be styled as the Adbhuta Synthesis.

॥ बालरामायणम् ॥

4535. BĀLARĀMĀYAṆAM.

Burnell's Catalogue No. 5190. Page 169. Right column.

Substance—Paper. Size—×8½ inches. Sheets—108. Lines—14 to 16 to a Page. Script—Devanāgari. No. of Granthas—3640. Author—Rājaśekhara. Complete.

Beginning:

प्रसत्तेर्यः पात्रं तिलकयति यं सूक्तिरचना
य आद्यः स्वादूनां श्रुतिचुलकलेहेन मधुना ।
यदात्मानो विद्याः परिणमति यश्चार्थवपुषा
स गुम्भो वाणीनां कविवृषनिषेव्यो विजयते ॥

End:

॥ तथापीदमस्तु भरतवाक्यम् ॥

सम्यक् संस्कारविद्याविशदमुपनिषद्भूतमर्थाब्रुवानां
प्रश्नन्तु ग्रन्थबन्धं वचनमनुपतत्सूक्तिमुद्राः कवीन्द्राः ।
सन्तस्सन्तर्पितान्तःकरणमनुगुणं ब्रह्मविद्भिः........
यन्मूर्ते सात्विकैश्च प्रथमपिशुनितं भावयन्तोऽर्चयन्तु ॥२१०॥

॥ इति निष्क्रान्ताः सर्वे ॥

Colophon:

राघवानन्दो नाम दशमोऽङ्कः ॥

इति राजशेखरविरचितं श्रीमद्बालरामायणं नाम नाटकं सम्पूर्णम् ॥

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेतश्रीरामचन्द्रार्पणमस्तु ॥

Subject: Bālarāmāyaṇa 1-10 acts.

Remarks:—The Ms. is in good condition. Alternate sheets are sulpherated.

This Prakaraṇa was composed by Rājaśekhara at the request of his pupil Mahendrapāla, king of Kānyakubja. Mahendrapāla's inscriptions dated in A. D. 898-907 are found and consequently Rājaśekhara should have flourished in the latter part of the 9th and the beginning of the 10th century.

The work is based upon the story of the Rāmāyaṇa and it is available in print having been published in Calcutta.

॥ बालरामायणम् ॥

4536. BĀLARĀMĀYAṆAM.

Burnell's Catalogue No. 5241. Page 169. Right column. Substance—Paper. Size—12¼ × 5 inches. Sheets—95. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—3640. Author—Rājaśekhara. Complete.

Beginning, end, colophon and subject—Same as No. 4535.

Remarks:—The Ms. is in a fairly good condition.

The verses found after the colophon in the next Ms. (No. 4537) are found here also.

॥ बालरामायणम् ॥

4537. BĀLARĀMĀYAṆAM.

J. L. Collection No. 655. Substance—Paper. Size—11½ × 4½ inches. Sheets—155 Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—3400. Author—Rājaśekhara. Complete.

Beginning, end, colophon and subject—Same as No. 4535.

Remarks:—The Ms. is in good condition. After the colophon is given the following :

सौजन्याङ्कुरकुन्दसुन्दरकथासर्वस्वसामन्तिनी-
चित्ताकर्षणमन्त्र[म]कर्षवल्लभसरिद्कल्लोलवाग्वल्लभः ।
सौहार्दैक.. ....
.... ॥

सवा राम किदा सेगं लख्लणं विअदंसणम् ।
लिहंवि मणिभिंचिवि बाळरामअणं बुहा ॥

कालुंमीलिअकेरघाअर धरिंजंमंत किंतछटा
मं यारं वरकेलि किंत्तिकलिआदिप्पत्तदि कोटिणो ।
माआअं लहइंसमोलिमणिनो रामं ससंगितणं
राआपीडकिअं मपत्थलिहिअं तं बालरामाअणे ॥

रइअं णिंभरगुरुणा भरिअं चरिएण रामचंदस्स ।
भलिहइकसणेमहि अं णाडअमहिमुंतदिरसस्संबंधम् ॥

श्रीः ॥ सीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेतसकलपरिवारपतये
श्रीरामचन्द्राय नमः ॥

॥ बालरामायणम् ॥

4538. BĀLARĀMĀYAṆAM.

Burnell's Catalogue No. 5191. Page 169. Right column. Substance—Paper. Size—$10\frac{1}{2} \times 5\frac{1}{2}$ inches. Sheets—40. Lines—12 to 14 to a Page Script—Devanāgarī. No. of Granthas—1200. Author—Rājaśekhara. Incomplete. Wants end.

Beginning—Same as No. 4535.

End:

(विचिन्त्य) । हंहो हृदय न विस्मर्तव्यम् ॥
यदावेदितममृतमयाक्षरं मायामयेन । यथा किल ।

Colophon: (13th Sheet)

भार्गवपुङ्गवो नाम चतुर्थोऽङ्कः ॥

Subject: Bālarāmāyaṇa 1-5 acts.

Remarks:—The Ms. is in a fairly good condition. This Ms. abruptly ends in the middle of the fifth act.

॥ बालरामायणम् ॥

4539. BĀLARĀMĀYAṆAM.

Burnell's Catalogue No. 10589. Page 169. Right column. Substance—Palm leaf. Size—$16 \times 1\frac{3}{4}$ inches. Leaves—182 Lines—7 to 8 to a Page. Script—Grantha. No. of Granthas—1000. Author—Rājaśekhara. Incomplete. (Wants in the middle)

Beginning, end, colophon and subject—Same as No. 4535.

Remarks:—The Ms. is in a fairly good condition. On the last

leaf is given

'नारोजीदीक्षितपुत्रस्य महादेवस्य पुस्तकं बालरामायणं'

Many leaves are missing in the middle

॥ बालरामायणटीका ॥

4540. BĀLARĀMĀYAṆAṬĪKĀ.

Burnell's Catalogue No 10590 Page 169. Right column. Substance—Palm leaf. Size—16½ × 1½ inches. Leaves —36 (172-207). Lines—7 to a page Script—Grantha. No. of Granthas—800. Author—? Incomplete.

Beginning

प्रणुतादित्यको···नीराजितादृग्रये ।
नमो निहन्त्रे विघ्नानां हेरम्बाय महात्मने ॥

अभिप्रुत्य महात्मानं राजशेखरसत्कविम् ।
बालरामायणस्याद्य टीका खलु विधीयते ॥

